उत्तरषट्कम्

कुलदीपिकाव्याख्यया

कुलपतेः श्रीवेङ्कटाचलस्य 'शिवसङ्कल्प'-पुरोवाचा च पुरस्कृतम्

सम्पादकः

आचार्यश्रीव्रजवल्लभद्विवेदः

सह-सम्पादकः

डॉ. शीतलाप्रसाद-उपाध्यायः

सम्पूर्णानन्द-संस्कृत-विश्वविद्यालयः

वाराणसी

योगतन्त्र-ग्रन्थमाला
[२२]

उत्तरषट्कम्

कुलदीपिकाव्याख्यया

कुलपतेः श्रीवेङ्कटाचलस्य 'शिवसङ्कल्प'-पुरोवाचा च पुरस्कृतम्

सम्पादकः

आचार्यश्रीव्रजवल्लभद्विवेदः
सांख्ययोग-तन्त्रागमविभागाध्यक्षचरः
सम्पूर्णानन्द-संस्कृत-विश्वविद्यालयस्य
वाराणसी

सह-सम्पादकः

डॉ. शीतलाप्रसाद-उपाध्यायः
प्राध्यापकः, साङ्ख्ययोग-तन्त्रागमविभागस्य
सम्पूर्णानन्द-संस्कृत-विश्वविद्यालये
वाराणसी

वाराणस्याम्

२०५१ तमे वैक्रमाब्दे १९१६ तमे शकाब्दे १९९४ तमे ख्रैस्ताब्दे

अनुसन्धानप्रकाशनपर्यवेक्षकः—
निदेशकः, अनुसन्धानसंस्थानस्य
सम्पूर्णानन्द-संस्कृत-विश्वविद्यालये
वाराणसी।

❑

प्रकाशकः—
डॉ. हरिश्चन्द्रमणित्रिपाठी
प्रकाशनाधिकारी,
सम्पूर्णानन्द-संस्कृत-विश्वविद्यालयस्य
वाराणसी-२२१ ००२.

❑

प्राप्तिस्थानम्—
विक्रय-विभागः,
सम्पूर्णानन्द-संस्कृत-विश्वविद्यालयस्य
वाराणसी-२२१ ००२.

❑

प्रथमं संस्करणम्, ५०० प्रतिरूपाणि
मूल्यम्—८०.०० रूप्यकाणि

❑

मुद्रकः—
तारा प्रिंटिंग वर्क्स
कमच्छा, वाराणसी-२२१ ०१०.

YOGATANTRA-GRANTHAMĀLĀ
[Vol. 22]

UTTARAṢAṬKAṂ

With the Commentary

`KULADĪPIKĀ'

Foreword by

PROF. V. VENKATACHALAM
Vice-Chancellor

Edited by

ĀCĀRYAŚRĪ VRAJAVALLABHA ḌVIVEDĪ
Ex-Head of the Dept. of Sāṅkhyayoga-Tantrāgama
Sampurnanand Sanskrit University
Varanasi

Assisted by

DR. ŚĪTALĀ PRASĀDA UPĀDHYĀYA
Lecturer, Sāṅkhyayoga - Tantrāgama - Dept.
Sampurnanand Sanskrit University
Varanasi

VARANASI
1994

Research Publication Supervisor—
Director, Research Institute,
Sampurnanand Sanskrit University
Varanasi-221 002.

❑

Published by—

Dr. Harish Chandra Mani Tripathi
Publication Officer,
Sampurnanand Sanskrit University
Varanasi-221 002.

❑

Available at—

Sales Department,
Sampurnanand Sanskrit University
Varanasi-221 002.

❑

First Edition, 500 Copies
Price Rs. 80.00

❑

Printed by—

TARA PRINTING WORKS
Kamachha, Varanasi-221 010

शिवसङ्कल्पः

अथायम् **उत्तरषट्का**भिधानस्तन्त्रशास्त्रग्रन्थोऽद्य यावत् क्वाप्य-प्रकाशितस्तत्प्रथमं प्रकाशपदवीमुपनीयत इति महान् प्रहर्षावसरोऽस्माकम्, तन्त्रशास्त्ररसिकानां सुधियां पाठकानाञ्च। किञ्चास्य नितरां प्राचीनस्य आगम-समकोटिकस्य ग्रन्थिभूयिष्ठस्य ग्रन्थस्यास्य सम्पादनभारः स्वयमूरी-कृतोऽस्मद्विश्वविद्यालयस्यैवाध्यापकचरैस्तन्त्रशास्त्रीयग्रन्थप्रकाशने कृतनिरन्तर-परिश्रमैः पण्डिताग्रणीभिः श्रीव्रजवल्लभद्विवेदिभिरिति शतगुणीभवति नः प्रहर्षभूमा। क्वचित् क्वचिदुत्तरकालिकेषु प्रामाणिकग्रन्थेषु नाममात्रोल्लेखेन, सनामोल्लेखमनामोल्लेखं वा सन्दर्भसमुद्धरणमात्रेण च विद्वद्गोष्ठीषु ज्ञातचरं नूत्नमिमं ग्रन्थम् इदम्प्रथमतया अक्षिविषयतामुपनतमासाद्य मोमुद्यमानः शास्त्ररसिकजनो ग्रन्थमेनमनुसन्धाय तत्र सम्पादकमहाभागैः प्रदर्शितानां नानाविधानां ग्रन्थीनां सन्दर्भान् विमृश्य "**श्लथीकृतदृढग्रन्थिः**" सत्रेतद्ग्रन्थ-"**रसोर्मिमज्जनसुखव्यासज्जन**"-मपि समासादयिष्यतीति विश्वसिमः।

ग्रन्थस्यास्य नामकरणविषये, पटलसंख्याविषये, पदे पदे च मातृकयोः स्थितानां पाठानामसामञ्जस्यदर्शनेन विद्वद्भिः सम्पादकैः कृतानां संशोधनानां विषये चास्त्येव भूयानवकाशः परिप्रश्नस्य गहनमननस्य च। मन्ये पण्डितपाठकाः स्वरसत एवात्मानमत्र व्यापारयिष्यन्तीति। विशेषतश्च पटलषट्कत्वनिर्णायके ग्रन्थनाम्नि जाग्रति सम्पादकाः पण्डितद्विवेदिनो मातृकाप्रमाणमपि युक्त्या न्यक्कृत्य सप्तपटलात्मकोऽयं ग्रन्थ इति यन्निरचैषिषुस्तदवश्यमेव पुनर्मन्थनमर्हति विदुषां बुद्धिक्षुब्धैः। ग्रन्थस्यास्य विद्यानाथप्रणीतत्वविषयेऽपि या विचिकित्सा समुत्थापिता सम्पादकैः साप्यर्हति विशिष्टमवधानं सहृदयपाठकानाम्।

सहृदयैः पाठकैरिमान् विषयाननुसन्धित्सुभिरिदं त्ववश्यं मनसि निधेयं भविष्यति यत् श्रीव्रजवल्लभद्विवेदिनोऽस्य ग्रन्थस्य सम्पादकास्तन्त्रसाहित्ये बहुश्रुता आत्मनो बहुज्ञतायाः फलं पदे पदे पाठकेभ्यः समुपहरन्त्येव। तच्च तैस्तेषु तेषु प्रसङ्गेषु संयोजिताभिष्टिप्पणीभिः स्फुटं प्रतिभासत एव। अत एव तदादृतेषु पाठेषु संशयालुभिः, तान् शुशोधयिषुभिः, तत्कृतेषु निर्णयेषु प्रमादमाषिपादयिषुभिर्वा पाठकैः सहसा न प्रवृत्तव्यमिति,सावधानं सम्यग्विचित्त्य निष्कर्ष एष्टव्यो वैदुष्यधनैः प्रौढमननैः पण्डितैरिति च विजिज्ञापयिषामः।

या चेयं टीका **कुलदीपिका**ख्यात्र प्रथमं प्राकाश्यमुपनीयते, सापि मूलार्थपरिज्ञाने बहूपकरिष्यति। यद्यपि मातृकादोषैर्मूलटीकयोर्यथायथं सम्पादने महानुपस्थितः क्लेशस्तथापि यावच्छक्ति सम्पादकैस्तत्परिहर्तुमास्थितः साधीयान् यत्न इति विद्वांसः पाठकाः स्वयमवगमिष्यन्ति। मातृकाक्लिष्टा एव विद्वांसो ज्ञातुं प्रभवन्ति अशुद्धमातृकासम्पादनक्लेशम्। तत्र च मुद्रकसंयोजिताः क्लेशाः गण्डस्योपरि पिटका इव पुनः क्लेशयन्त्येवेति नैव न जानीमः।

ग्रन्थान्ते दीपिकाया उपसंहारपद्ये जातः प्रमादस्तु ईदृशस्यैव कस्यचित् प्रमाद इति निश्चप्रचम्। मातृकाप्रमादाद्वा इतरथा वा तत्र "कुदेशिकोपदेशान्धतमसः प्रतिघातिनी" इति पूर्वार्धे "**०तमसः**" इति सविसर्गपाठो न मूलग्रन्थलेखककृत इत्यत्र सर्वथा नास्त्यवकाशः संशयस्य। "**अवसमन्धेभ्यस्तमसः**" इति पाणिनिकृतं समासान्तानुशासनमजानानस्यास्मरतो वा कस्यापि मातृकाप्रतिलिपिकारस्य, मुद्राक्षरयोजकस्य, 'प्रूफ्'संशोधकस्य वा स्यादिदं हस्तलाघवम्, न त्वत्र विदुषो मूललेखकस्य संभाव्यतेऽपराधकणिकापीति करतलामलकवत् स्पष्टमिति, अत एवात्र "कुदेशिकोपदेशान्धतमसप्रतिघातिनी" इति समस्त एव मूलपाठ इति चातिरोहितं सूक्ष्मेक्षिकावित्तानां विमर्शकपाठकानाम्। अतश्च प्रार्थयामहे यदीदृशानि प्रमादस्खलितानि यथायथं संशोध्य नीरक्षीरविवेकिनः सन्तो ग्रन्थपङ्क्तीनां मूलस्वरूपं यथातथं परिचिन्वन्तु, क्षाम्यन्तु चास्मानिति।

मातृकाप्रतिलिपीरन्यतः समानाय्य महता नैपुणोपबृंहितपरिश्रमेण सम्पाद्य मुद्रणार्थं सज्जीकृतवन्तः परमसात्त्विकाः पण्डितव्रजवल्लभद्विवेदिनः, ईदृशेषु सारस्वतकार्येष्वश्रान्तमहर्निशं परिश्राम्यन्तस्तत्सहायकाः डॉ. शीतलाप्रसादोपाध्यायाः, ग्रन्थमुद्रणादिषु बहुकार्येषु निसर्गशूरा अस्मत्प्रकाशनाधिकारिणो डॉ. हरिश्चन्द्रमणित्रिपाठिनस्तत्सहकारिणः, तारामुद्रणालयस्वामिनः श्रीरविप्रकाशपण्ड्याश्चेति सर्वेऽप्यस्माकं साधुवादानामभिनन्दनवादानामाधमर्ण्यवादानाश्च पात्रमिति सर्वं शिवम्।

वाराणस्याम्
मार्गशीर्षशुक्लैकादश्याम्,
वि. सं. २०५१
(१३.१२.१९९४)

वि. वेङ्कटाचलम्
कुलपतिः
सम्पूर्णानन्दसंस्कृतविश्वविद्यालयस्य

प्रस्तावना

अथेदं समुपस्थाप्यते त्रैपुरतन्त्रानुरागिणां विदुषामुपासकानां पुरत उत्तरषट्कं नाम प्राचीनतमं त्रैपुरं तन्त्रम्, ब्रह्मानन्दपरम्परानुगतेन केनचिद् विदुषा विरचितया कुलदीपिकाख्यया व्याख्यया सहितम्। योगिनीहृदयदीपिकायां (पृ. ३०५) उत्तरपदनाम्नाऽत्रत्यः प्रथमः श्लोकः स्मृतः। ऋजुविमर्शिन्यां शिवानन्दविरचितायां नित्याषोडशिकार्णवटीकायां त्रिपुराभारतीलघुस्तवव्याख्ययोश्च उत्तरषट्कनाम्नैवात्रत्याः श्लोकाः स्मर्यन्ते। नि. षो. उपोद्घाते (पृ. ३२), लुप्ता. उपोद्घाते (पृ. २२) च चर्चित एष ग्रन्थोऽस्माभिः।

उत्तरषट्कपदप्रवृत्तिनिमित्तम्

किं नाम उत्तरषट्कपदस्य प्रवृत्तिनिमित्तमिति तु नाद्यावध्यस्माभिः परिज्ञातम्। यास्कविरचिते निरुक्ते दृश्यते षडध्यायात्मकं पूर्वषट्कम्, ततः परं चापरषडध्यायात्मकमुत्तरषट्कम्। तथैवात्रापि षट्पटलात्मकेन पूर्वषट्केन भाव्यम्। दक्षिणषट्कपदं च दृश्यते प्रयुक्तं गोरक्षसंहितायां (१६।३७) मतोत्तरापराभिधायाम्। तत्र किमभिव्यनक्ति पदमेतदिति न स्पष्टीभवति। उत्तरषट्के चात्र दृश्यन्ते सप्त पटलानि। यद्यपि मद्रासमातृकायां तृतीयपटलसमाप्तौ चतुर्थपटलसमाप्तौ च तृतीयमित्येव पाठ इति कृत्वाऽन्ततः षट्पटलान्येव स्थाप्यन्ते, त्रिवेन्द्रंमातृकायां द्वितीयपटलसमाप्तिसूचकं वाक्यं नास्ति, तृतीयपटलान्ते च ग्रन्थपातो जात इति पटलसंख्यानिर्धारणे तया मातृकया किमपि साहाय्यं नोपलभ्यते। मद्रासमातृकायां सप्त पुष्पिकावाक्यानि सन्ति षटलसमाप्तिसूचकानीति तदनुसारमेवात्र तृतीयचतुर्थपटलयोस्तृतीयपदस्य पुनरावृत्तिं विहाय सप्तपटलात्मकोऽयं ग्रन्थोऽधुनास्माभिः समुपस्थाप्यते। षष्ठं पटलमतीव लघु, किन्तु वर्तते तत्र "नवलक्षं कथं देव" इति पटलान्तरारम्भसूचकं वाक्यमिति तस्य विषयान्तरप्रतिपादके पञ्चमपटले समावेशो नैव कर्तुं शक्यते। अत्रावधातव्यं मनीषिभिः षट्पटलात्मकेनैवानेन ग्रन्थेन भाव्यं न वेति।

उत्तरषट्कम्

अत्र मूलग्रन्थे न कोऽप्यपरो ग्रन्थः स्मर्यते। मतोत्तरविषयकश्च प्रश्नः ३२ पृष्ठस्थटिप्पण्यां समाहित एव, वक्ष्यते चात्र परस्तात्। मतोत्तरे (१६।३७) उत्तर-दक्षिणषट्कपदयोरुपलम्भात् तदाविर्भावकालात् पूर्वमुत्तरषट्कस्य स्थितिः संभाव्यते। अत्रास्माकमिदं प्रतिभाति— चतुराम्नायसाधारणीयं त्रिपुरा विद्येति[1] विद्यानन्दामृतानन्दनाथादयो व्याहरन्ति। तत्र नित्याषोडशिकार्णवे दक्षिणाम्नाय(कुल)पद्धत्या, महार्थमञ्जर्यां तत्परिमले च उत्तराम्नाय(क्रम)पद्धत्या, उत्तरषट्के चात्र पश्चिमाम्नाय(मत)पद्धत्या सेयं देवी समुपास्यत्वेन वर्णितेति। अत्र [2]त्रैलोक्यडामरे यन्त्रेऽष्टपत्रे षोडशपत्रे वा देवीसमाराधनं प्रदर्शितम्। सेयं प्रक्रिया न दृश्यते नित्याषोडशिकार्णवादिषु त्रैपुरतन्त्रेषु। अत्र मूलमन्वेषणीयम्।

उत्तरषट्कं नाम तन्त्रं विद्यानाथेन रचितमिति सूचीग्रन्थेषु दृश्यते। अत्र प्रमाणं नोपलभामहे। व्याख्याता विद्यानाथो भवितुमर्हति। किन्तु तस्याप्युल्लेखो न दृश्यते पुष्पिकादिषु। विद्यापीठविनिर्गतमिदं तन्त्रमिति तु सत्यम्। सटीकस्यास्य ग्रन्थस्य सम्पादनं मातृकाद्वयाधारेण सम्पन्नम्। तत्रैका (II ४३७) मद्रपुरीयाऽपरा (९११B) च त्रिवेन्द्रंनगरस्था। उभे अपि मातृके सटीके स्तः। तत्र मद्रपुरीया मातृका सम्पूर्णाऽप्यशुद्धिभूयिष्ठा, अपरा च मध्ये मध्ये खण्डिता। अत्र ३४, ४०, ४४ पृष्ठस्थाष्टिप्पणीर्द्रष्टव्याः। त्रि. प्रायः शुद्धा ग्रन्थसंशोधनेऽतीवोपयुक्ता। अत एव तस्या अभावे पाठा बहुषु स्थलेष्वर्थलापनेऽसमर्थाः सन्ति। सम्पादनकर्मण्यस्माभिः सैव पद्धतिरङ्गीकृता, या

---

१. "इयं च विद्या चतुराम्नायसाधारण्यपि दक्षिणपक्षपातिनीति" (अर्थ., पृ. ४१), "दक्षिणस्रोतःपक्षपातिन्याः सौभाग्यविद्यायाः" (दीपिका, पृ. १३३-१३४)। योगिनीहृदय, उपोद्घात (पृ. ७) भी द्रष्टव्य।

२. त्रिपुराभारतीलघुस्तवे सव्याख्ये (पृ. २, २४) यन्त्रमित्यस्य स्थाने मन्त्रमिति पाठो नैवोचितः, तत्रैव तृतीये पृष्ठे यन्त्रमिति पाठदर्शनात्। "एष यागः समाख्यातो डामराख्यस्त्रिशक्तिकः" (३१।१००) इत्यत्र तन्त्रालोके मण्डलाह्निके एकत्रिंशे डामराख्ययागपदेनास्यैव मण्डलस्य (यन्त्रस्य) विन्यासप्रकारो नैकतन्त्रप्रामाण्येन प्रदर्शित इति प्रतीयते। तत्र (३१।५४) कस्यचन षट्कनामकस्य ग्रन्थस्याप्युल्लेखो दर्शनार्हः। किमत्रत्यं षट्कपदमुत्तरषट्कस्य प्रविभावकम्।

हि पूर्वं नित्याषोडशिकार्णवादिषु निश्चिताऽऽसीत्। तदनुकारेणैवात्र कुलदीपिकाधृतवचनानां स्थाननिर्देशाय यथाशक्ति प्रयतितम्।

कुलदीपिकाकारः

प्रथमश्लोकव्याख्यापातनिकादर्शनेनेदं ज्ञायते यद् ब्रह्मानन्दष्टीकाकारस्य परमगुरुरिति, तेन च परमगुरुमुखागमसंवादपुरस्सरं श्रीमदुत्तरषट्कस्य कुलदीपिकाख्यं विवरणं कृतमिति। अस्य प्रयोजनं वर्णयता तेनोक्तम्— "श्रीमति दक्षिणस्रोतसि श्रीरुद्रयामले निखिलजगद्रक्षणाय समुद्घोषितस्यापि श्रीमत्काश्मीरसिद्धसम्प्रदायदरिद्रैरभागधेयैर्यथातथ्यापरिज्ञानात् स्वमनीषिकापरम्परया कुदेशिकैर्विप्लवतोपदिष्टा" (पृ. १) इति। तद्वैषम्यं हि परिहरता टीकाकारेणैषा व्याख्या संदृब्धेति तेन स्पष्टीभवति, किन्तु कोऽयं ब्रह्मानन्दः? कुत्र कदा जनिं लेभे? कश्चायं टीकाकार इति नाधुना किमपि स्पष्टीभवति।

कुलदीपिकाधृता ग्रन्था ग्रन्थकाराश्च

अत्र 'अन्ये' (पृ. ४) इति पदेन कश्चनोत्तरषट्कस्यैव टीकाकारो गृहीतः स्यात्। 'तत्र' पदं रुद्रयामलम् (पृ. २९), क्रमनिर्णयं (पृ. ५२) च स्मरति। 'तदुक्तम्' (पृ. १२) इत्युक्त्वोद्धृतं वचनं क्वत्यमिति न ज्ञायतेऽधुना। 'तन्त्र'-शब्देन बाहुल्येनात्र उत्तरषट्कस्यैव परामर्शः क्रियते। उपनिषत्पदेन ऐतरेयोपनिषत्, श्रुतिपदेन च ऋग्वेदः, ऐतरेयारण्यकम्, बृहदारण्यकोपनिषत्, सूर्यतापिन्युपनिषत्, ऐतरेयब्राह्मणमित्येते ग्रन्थाः स्मर्यन्ते। भगवद्गीता प्रसिद्धैव। शिवसूत्रविमर्शिन्यादिषु नेत्रतन्त्रं मृत्युञ्जयभट्टारकनाम्ना स्मर्यते। अत्र (पृ. ३८) मृत्युञ्जयसारश्रीमदमृतोद्योत इति, उक्तं चामृते (पृ. ६५) इति च स्थलद्वयेऽमृताख्यो ग्रन्थो व्याख्यासहितः स्मर्यते। अत्रत्यावुभाविमौ विषयौ मृत्युञ्जयभट्टारकापरनामधेये नेत्रतन्त्रनाम्ना मुद्रिते मार्गयितुं शक्येते, यस्य हि मातृकाऽमृतेशतन्त्रनाम्नाऽपि नेपालसूचीपत्रे[३] समुपलभ्यते।

---

३. श्रीमता बुद्धिसागरपरांजुलिना सम्पादितं तन्त्रविषयकं सूचीपत्रं (भा. १, पृ. ५-६) द्रष्टव्यम्।

सौन्दर्यलहरीटीकायां लक्ष्मीधरायां पूर्वकौला उत्तरकौलाश्च स्मर्यन्ते । अत्र च उत्तरकौलाख्यः कश्चन ग्रन्थः स्मर्यते । उत्पलदेवपाद ईश्वरप्रत्यभिज्ञाकारिका-कर्ता । अत्रत्य आद्यः श्लोकोंऽशेनात्र समुद्धृतः । कालतन्त्रविषयेऽत्रत्या (पृ. १३) टिप्पणी द्रष्टव्या । काश्मीरसिद्धसम्प्रदाय इत्यस्य काश्मीराणां सिद्धानां सम्प्रदाय इति व्युत्पत्तिः कर्तुं शक्यते । नायं कस्यचन ग्रन्थस्य नाम । कुब्जिका-मतस्य षट्सहस्रश्लोकात्मकं सार्धचतुःसहस्रश्लोकात्मकं चेति संस्करणद्वयं समुपलभ्यते । तत्रैकः सम्पूर्णः, अपरस्य च पञ्च पटलानि साम्प्रतं रोमनलिप्यां प्रकाशितानि[४] समवाप्यन्ते । अत्रोदाहृतानि बहूनि वचनानि कुब्जिकामतस्यो-भयोरपि संस्करणयोर्नोपलभ्यन्ते । एकं संस्करणं सम्पूर्णं न प्रकाशितमिति तद्वि-षये साम्प्रतं याथातथ्येन किमपि वक्तुं न शक्यते । कुलपद्धतिरिति न कस्यचन ग्रन्थस्य नाम, किन्तु कुलचक्रस्यैवेयं संज्ञा । कुलमूलावतार इति कश्चन प्राचीनो विशिष्टो ग्रन्थो बहुषु स्थलेषु समुद्ध्रियते । केवलपदेन परामृष्टं वचनमैतरेय-ब्राह्मणस्य, एतदर्थं किमर्थं केवलपदप्रयोगः कृत इति तु न ज्ञायते । क्रमनिर्णयः, क्रमनिर्णयं श्रीमतमित्युभे नामनी शम्भुनिर्णयस्यैव स्याताम् । अत्र ५२ पृष्टस्था टिप्पणी लुप्ता. उपो. (पृ. ७०) च द्रष्टव्यौ ।

अस्मिन् व्याख्याने कुब्जिकामतम्, क्रमनिर्णयं श्रीमतम्, निर्गुडं श्रीमतम्, निगूढं श्रीमतम्, पारमेश्वरमतम्, रत्नाख्यं श्रीमतम्, श्रीमतम्, श्रीमतोत्तरम्, सिद्ध-योगीश्वरीमतमित्येवं बहवो मतपदालङ्कृता ग्रन्थाः समुद्धृताः सन्ति । तत्र द्विविधं कुब्जिकामतं रोमनलिप्यां प्रकाशितमित्युक्तपूर्वम् । क्रमनिर्णयः शम्भु-निर्णयादभिन्नश्चेत्, तस्य मातृका समुपलभ्यते, सिद्धयोगीश्वरीमतस्य च । निर्गुडं श्रीमतं, निगूढं श्रीमतं चाभिन्नमेव स्यात् । सर्वेषामेषां मतग्रन्थानां विषये साम्प्रतं न कापि सूचना समधिगम्यते । चर्चास्तवः, लघुस्तवश्च पञ्चस्तव्यां प्रकाशितौ स्तः । पञ्चस्तवी कस्यचनैकस्यैव विदुषः कृतिरिति प्रायः प्रसिद्धिः । अत्र तु

---

४. कुलालिकाम्नायापराभिधस्य कुब्जिकामतस्य सम्पूर्णस्य सार्धत्रिसहस्रश्लोकात्मकस्य डॉ. तूनगान्द्रियान- डॉ. जे. ए. सोत्रामनसम्पादितस्य संस्करणं १९८८ ई. वर्षे, षट्सा-हस्रिकापरनामधेयस्य कुब्जिकामतस्य च केवलं पञ्चपटलात्मकं संस्करणं डॉ. सोत्रा-मनसम्पादितं १९८२ ई. वर्षे लीडेन (हालैण्ड) स्थितया ई. जे. ब्रिल. इति संस्थया प्रकाशितम् ।

लघुस्तवकर्ता लघुपाद:, चर्चास्तवकर्ता च चर्चापाद इति पृथक् कर्तारौ स्मर्येते। किमत्र बीजमिति न जानीमहे। ज्येष्ठनाथपदेन कस्याचार्यस्य ग्रहणं कर्तव्यमित्यपि न स्पष्टीभवति। [५]ऋजुविमर्शिन्यामर्थरत्नावल्यां ज्ञानदीपविमर्शिन्यां च ज्येष्ठनाथः कश्चन स्मर्यते। तूष्णीषनाथ इति परमभैरवभट्टारकस्यैवापरमभिधानमिति व्याकरोति टीकाकार:, अथापि ज्येष्ठनाथवत् तूष्णीषनाथोऽपि कश्चन सिद्धाचार्यो भवितुमर्हति। निश्वासकारिका[६] सिद्धान्तशैवग्रन्थेषु स्मर्यते। ततोऽभिन्न एष ग्रन्थो भिन्नो वेति न किमपि वक्तुं शक्यते। मातृकाभेदतन्त्रमिति मुद्रितो ग्रन्थ आस्ते, किन्तु तत्र मातृकातन्त्रस्यात्रत्यं वचनं नोपलभ्यत इति ततो भिन्न एवैष ग्रन्थः। "तान्त्रिक साहित्य" (पृ. ५०७) इत्यत्र मातृकातन्त्रं विवियते। मृत्युञ्जयसारविषये पूर्वमेवोक्तममृताख्यग्रन्थपरिचयावसरे। 'रहस्यागमेषु' (पृ. १०) इति न कस्यचन ग्रन्थविशेषस्य संज्ञा, किन्तु सामान्येन सर्वेषां रहस्यागमानां स्मारकः शब्दोऽयम्। रहस्योपनिषत्पदेन तु योगिनीहृदयदीपिकायां महास्वच्छन्दवचनत्तत्वेन धृतः श्लोकः स्वच्छन्दतन्त्रेऽपि (८।३१) समुपलभ्यते।

रुद्रयामलतन्त्रं बहुधाऽत्र स्मर्यते। अत्रत्यो नैकोऽपि प्रसङ्गः साम्प्रतं बहुधा मुद्रिते रुद्रयामले समुपलभ्यते। नित्याषोडशिकार्णव-ज्ञानदीपविमर्शिन्यादिषु स्मृता अंशा अपि तत्र नैव सन्ति। रुद्रयामलतन्त्रं परिचाययद्भिरस्माभिर्नित्याषोडशिकार्णवस्य उपोद्घाते बहुभ्यो वर्षेभ्यः पूर्वमुक्तमासीत्— "रुद्रयामलसंबद्धयावदुपलब्धसामग्रीसंकलनमुखेन ग्रन्थस्यास्य प्रामाणिकं संस्करणं नितान्तमपेक्षितम्। तच्च सज्जीक्रियते वाराणसेयसंस्कृतविश्वविद्यालयस्थेन योगतन्त्रविभागेन" (पृ. ४५) इति। योगतन्त्रविभागसंस्थापकैः श्रद्धास्पदैर्गुरुचरणैर्येऽस्य यामलस्य प्राचीना अंशाः संगृहीता आसन्, ते कुत्र विलीना

---

५. उपर्युक्तटीकाद्वयसहितस्य नित्याषोडशिकार्णवस्य वाराणसीसंस्करणं (पृ. २२०-२२२) द्रष्टव्यम्। अर्थरत्नावलीस्थितः सम्पूर्णोऽपि पाठोऽत्रत्यो ज्ञानदीपविमर्शिन्यामपि प्रकाशयिष्यमाणायामानुपूर्व्या विद्यते। विषयोऽयममृतानन्देनापि सौभाग्यसुधोदये (पृ. ३१९-३२०) चर्च्यते। अत्र हादिविद्याया दिव्यौघगुरवश्चतुर्युगाधिपतयो वर्ण्यन्ते। तेषु ज्येष्ठनाथोऽन्यतमः।

६. निश्वासकारिकापरिचयो लुप्ता. उपो. (पृ. ४५) इत्यत्र द्रष्टव्यः।

इति न ज्ञायते। साम्प्रतमुपलभ्यमाने रुद्रयामले तस्योत्तरँभागत्वं प्रख्याप्यते। उत्तरषट्कमिदं तस्यैव रुद्रयामलस्य षट्पटलात्मको भागः स्यादित्यपि संभावयितुं शक्यते। रामायणमहाभारत- पुराणादिवत् तान्त्रिके वाङ्मये किमपि स्वीयं वैशिष्ट्यं ख्यापयतो रुद्रयामल- तन्त्रस्यापि समग्रेऽपि भारते विदेशेषु च समुपलभ्यमाना विशिष्टा मातृकाः संगृह्य किमपि विशिष्टं संस्करणं क्रियेतेत्यत्र भगवान् रुद्र एव शरणं नः।

विज्ञानभट्टारकपदेन विज्ञानभैरवाख्यो ग्रन्थः स्मर्यते। सोऽयं ग्रन्थष्टीकात्रयसहितः कश्मीरसंस्कृतग्रन्थावल्यां मुद्रितपूर्वो हिन्दीभाषायामांग्लभाषायां फ्रेंचभाषायां चानूदितः स्वीयं कमपि विशिष्टं महिमानं ख्यापयति। व्याकरणपदं नात्र व्याकरणग्रन्थस्य कस्यचन बोधकम्। सूप्रवरसूत्रमित्यनेनापि न कोऽपि ग्रन्थः परामृश्यते। प्रस्तुतस्यैव ग्रन्थस्य श्लोका यत्र तत्र टीकाकारेण सूत्रपदेन परामृष्टाः। हंसभेदो हंसनिर्णयो वा अर्थरत्नावल्यां नित्याषोडशिकार्णवटीकायां (पृ. ३६) स्मर्यते। तत्र हंसनिर्भेद इति, हंसभेद इति च पाठान्तरं वर्तते। हंसभेदस्थाः केचन श्लोका महार्थमञ्जरीपरिमले (पृ. ६, ५७, ११९) दृश्यन्ते। हंसभेद एव हंसनिर्णयः, भिन्नो वैष ग्रन्थ इति न वक्तुं पार्येत।

सटीकग्रन्थसंक्षेपः

प्रथमः पटलः

सितकेसरसंकुले सहस्रारे व्योमाम्बुजे समासीनं महादेवं भैरवं कुलनायिका देव्यास्त्रिपुराया मन्त्रविनिर्णयं पृच्छति। सा [७]'लिङ्गत्रय-महापद्मवन-कदम्बगोलक-ब्रह्मरन्ध्र-मुद्रापञ्चक-पीठत्रय-कुलाकुलविभागसंबद्धान् सप्त प्रश्नान्

---

७. "इदानीमुत्तराकाण्डं वद श्रीरुद्रयामलम्" (१।३), "एतदुक्तं महादेवोत्तरतन्त्रनिरूपणम्" (२८।१०) इति वचनद्वयं पुष्पिकावाक्यानि चावलोकनीयानि।

८. लिङ्गत्रय-महापद्मवन-ब्रह्मरन्ध्र-पीठत्रय-कुलाकुलशब्दा अन्यत्रापि व्याख्यायन्ते। कदम्बगोलक-मुद्रापञ्चकशब्दयोस्तु वर्तते कश्चन विशेषः। कदम्बगोलकशब्दो बहुशो दृष्टोऽपि न परिभाष्यते। अत्र च महापद्मवनमध्यगतं कर्णिकास्थानीयमन्तर्गतत्रिकोणं षट्कोणं कैलासप्रस्तारूपमूर्ध्वं कामतत्त्वयन्त्रात्मकं वह्निमण्डलं कदम्बगोलकाकार-

समुपस्थापयति, परमेश्वरश्च सर्वामेतान् प्रश्नान् क्रमशः समादधाति। अन्तिमस्य कुलाकुलविभागविषयकस्य प्रश्नस्य समाधानप्रसङ्गेऽत्र पश्चिमाभिमुखलिङ्ग-स्वरूपप्रदर्शनसमये या योनिमुद्रा सूचिता, तस्या बन्धनप्रकारो निरूपितः। एत-त्साहाय्येनैव कामतत्त्वस्य सूक्ष्मा शिखा चिद्रूपा परमा कला ब्रह्ममार्गेण गच्छन्ती अकुलं प्रविशति, अकुलामृतं पीत्वा पुनः कुलस्थानमायाति। सेयं प्रक्रिया नित्याषोडशिकार्णवे (४।४-१८) सुस्पष्टं वर्णिता, जयरथ-शिवानन्द-विद्यानन्द-भासुरानन्दव्याख्यानेषु च तदीयेषु विस्तरेण विवृता।

उक्तान् सप्त प्रश्नान् समाधायात्र भगवता भैरवेण मात्रायोगो व्याख्यातः। पूर्वोक्ता शिखैवात्र मात्रापदेन परिचीयते। सा च प्राणस्वरूपा। सोऽयं प्राणो यदा प्राणान्तं स्पृशति, तदा स [९]उद्घातपदाभिधेयो भवति। टीकाकारेण सोऽयं विषयो विज्ञानभैरव-भगवद्गीतादिग्रन्थसाहाय्येन स्पष्टीकृतः। अन्ते चात्र योनि-मुद्राबन्धस्य माहात्म्यं संवर्ण्य दीक्षाया अधिकारिणं च प्रदर्श्य मन्त्रस्यास्य अभ्यसनेन सर्वं सिद्ध्यतीति निर्णीयते। अत्र ३४तमश्लोकस्योत्तरार्धे 'सन्तर्प्य' इत्यादिका पङ्क्तिः पुनरपि दृश्यते। सा चानपेक्षिताऽप्रासङ्गिकी च, ३० तमे

त्वात् कदम्बगोलकपदेनोच्यते। कदम्बगोलकमेतद्यथा वह्निमण्डलमित्याख्यातम्, त-थैव महापद्मवनं परमादित्यात्मकज्योतिर्मण्डलत्वेन, ब्रह्मरन्ध्रं च चान्द्रमसमण्डलत्वेन व्याख्यायते। कुण्डलिनीत्रितयात्मकेऽस्मिन् मण्डलत्रये वाग्भव-कामराज-शक्ति-बीजानां ध्यानमुदयविश्रान्तिलयविभावनपुरस्सरं योगिनीहृदयदीपिकापद्धत्या (पृ. ३५९) विधातुं शक्यते। मुद्रापञ्चकपदेन चात्र पृथिव्यादिपञ्चभूतानां क्रमादाधार-स्वाधिष्ठानमणिपूरकानाहतविशुद्ध्याख्यस्थानगतानि लकारवकाररेफयकारघोषा-ख्यानि बीजानि स्मर्यन्ते।

९. उद्घातशब्दो योगभाष्ये तद्व्याख्यायां च प्राणायामप्रकरणे (२।५०) प्रयुज्यते, किन्तु तत्र तस्य लक्षणं न दृश्यते। मतङ्गपारमेश्वरागमे योगपादे तस्य सुस्पष्टं लक्षणमेवं प्रदर्श्यते— "सम्यग् वायोर्निरुद्धस्य कोष्ठस्थस्य चलात्मनः। प्रधावतोर्ध्वं यातस्य स्वभावेनात्मवर्तिना॥ ब्रह्मरन्ध्राब्जसम्प्राप्तिः शनैराकृष्य धारणात्। वितत्य कुक्षिविवरे नाभौ विक्षिप्य लेशतः॥ ऊर्ध्वमाघातधर्मित्वात् साटोपाद् ग्रन्थिभेदनात्। उद्घाट-नाच्च ग्रन्थीनामुद्घातः परिभाष्यते॥" (७।१-४) इति। १-६८ श्लोकात्मकेऽस्मिन्नु-द्घातपटले तत्साहाय्येन पुरसंक्रमण-मृत्युभयनिवारण-आपन्निवर्तन-देहत्याग-शिव-पदप्राप्त्यादिकं वर्ण्यत इति विशेषजिज्ञासुभिः सोऽयं सम्पूर्णः पटलः पठनीयः। स्वच्छन्दतन्त्रे चोद्घातलक्षणम् (७।३०१-३०२), उद्घातपञ्चकं (५।५४-६१) च द्रष्ट-व्यम्।

श्लोक एव हि सा सङ्गता। एवं सप्तावान्तरप्रश्नसमाधानमुखेन प्रथमेऽस्मिन् पटले मन्त्रविनिर्णयाख्यो मुख्यः प्रश्नः समाहितः।

इदमत्रावधेयम्— अत्र त्रीण्येव[१०] लिङ्गानि, त्रीण्येव च पीठानि व्याख्यातानि, न योगिनीहृदयवच्चत्वारि चत्वारि। हृद्ग्रन्थिपदव्याख्यानावसरे च (पृ. ३) मन्त्र-मुद्रा-मण्डल-विद्याख्याश्चत्वारो ग्रन्थयो व्याख्याकारेण प्रदर्शिताः। "ते च आदित आरभ्य मातृकाचक्रस्य द्वादशभिर्द्वादशभिर्गणैश्चतुर्धा विभक्तस्य क्रमात् संज्ञा वेदितव्याः" (पृ. ३-४) इत्येवं व्याख्याकारोऽत्र तानेतान् चतुरो ग्रन्थीन् स्पष्टयति, कुब्जिकामतवचनानि च प्रमाणत्वेन समुद्धरति। अत्रत्यः श्लोक एको गोरक्षसंहितायां (१६।२६) च मतोत्तराख्यायां दृश्यते।

"चतुष्पीठं महातन्त्रम्" (१।५) इति स्वच्छन्दतन्त्रवचनव्याख्याने क्षेमराजः स्वच्छन्दतन्त्रं मुद्रा-मन्त्र-मण्डल-विद्याख्यं[११] चतुष्पीठप्रतिपादकं समग्रं तन्त्रं मनुते। अत्र तन्त्राणां स्रोतआम्नायविभागवत् पीठविभागोऽपि प्राक् प्रचलित आसीदित्यस्माभिर्नित्याषोडशिकार्णवस्य उपोद्घाते (पृ. ५६-५७) प्रदर्शितम्। तमेतं विभागं तन्त्रालोककारोऽपि (३७।१८-२५) स्वीकरोति। सोऽयं विभागः साम्प्रतं विलुप्त इव दृश्यते। ब्रह्मयामले तु चतुर्णामप्येषां विभागानां पृथक् पृथक् तन्त्राणि वर्णितानि। स्वच्छन्दवचनेन चेदमेव प्रतीयते यच्चतुर्विधानामपि पीठतन्त्राणां सर्वे विषया अत्र संगृहीताः सन्तीति। किन्त्वस्य चतुर्विधस्य विभागस्य उत्तरषट्क--व्याख्यात्रा कृतेन मातृकाणां चतुर्विधेन विभागेनास्ति वा कश्चन संबन्ध इति नाधुनाऽपि स्पष्टीभवति। सोऽयं विषयः सविशेषमनुसन्धानमपेक्षते।

---

१०. अत्र मूले स्थापिता टिप्पणी द्रष्टव्या। नि. षो. टीकायां (पृ. २७०) धृतः पाठ एव शोभनः। इतरमित्यादिका पङ्क्तिर्न विद्यते त्रि. मातृकायाम्। तत्र इतरं परं चेति लिङ्गद्वयं प्रतिपाद्यते। लिङ्गत्रयप्रतिपादकेऽस्मिन् ग्रन्थे तत्र समञ्जसमिति विभावनीयम्। व्याख्याकारेणायमेव पाठः स्वीकृतः, लिङ्गत्रयपरकतया च स योजितः। किन्तु तत्र रूपातीतपरशब्दयोः प्रयोगो नैव समञ्जसो भवति, तंयोश्चतुर्विधलिङ्गप्रदर्शकत्वात्।

११. तन्त्रालोकेऽभिनवगुप्तेन ३० तमे आह्निके मन्त्रविद्ययोः, ३१ तमे मण्डलस्य, ३२ तमे मुद्रायाश्च स्वरूपं नानातन्त्रप्रामाण्येन वर्ण्यते। एतेन मन्त्र-विद्या-मण्डल-मुद्राप्रतिपादकानां तन्त्राणां नामान्यप्यवगन्तुं शक्यन्ते। नि. षो. उपोद्घाते (पृ. ५६-५७) च ब्रह्मयामलप्रामाण्येन धृतानि चतुष्पीठतन्त्रनामानि विवरणं चान्यदवलोकनीयानि।

द्वितीयः पटलः

द्वितीये पटले देव्याः प्रश्नं विनैव त्रिपुरावाचकं त्रैलोक्यडामरं[१२]यन्त्रं सम्प्रदायसमन्वितं संप्रवक्ष्यामीति भैरवः स्वयमेव प्रतिज्ञाय संक्षेपेण तदुद्धारं च प्रदर्श्य तत्र [१३]मातृका-पीठ-भैरव-योगिनीविन्यासप्रकारमुपदिशति। "सकारो जीवभूतस्तु हकारः प्राण उच्यते" (२।१७) इत्युक्त्वा "एवं न्यस्य विधानेन पूजयेत् कुलपद्धतिम्" (२।१८) इत्याह भगवान्। ततः परं सामान्यानि विशेषात्मकानि च वाग्भव-कामकाज-शक्तिबीजानि समुद्धरता भगवता बीजत्रयात्मिकायास्त्रिपुराविद्यायाः [१४]पूर्वसेवा(पुरश्चरण)प्रकार उपदिष्टः, व्याख्याकारेण च जीवप्राणभूतयोः सकारहकारयोः स्वरूपं निरूपयता श्रीमत-सिद्धयोगीश्वरीमत-लघुस्तवादिग्रन्थांश्च समुद्धरता वाग्भवादिबीजानां स्वरूपं सविशेषं स्फुटीकृतम्। अत्रत्यो लक्षशब्दो मासपर्याय इत्याह टीकाकारः (पृ. २७), तत्र हंसभेदं च प्रमाणत्वेन समुदाजहार।

तृतीयः पटलः

अत्रारम्भे देवी [१५]कामतत्त्वविषयकं प्रश्नं प्रस्तौति, भैरवश्च पञ्च कामबीजानि समुद्धरन् तत्स्वरूपं प्रकाशयति। अत्र टीकाकारः सम्पूर्णस्य प्रकरणस्य

---

१२. अत्र द्वितीया टिप्पणी पुनरपि पठनीया।

१३. "गणेशग्रहनक्षत्रयोगिनीराशिरूपिणीम्। देवीं मन्त्रमयीं नौमि मातृकापीठरूपिणीम्॥" इति नि. षो. आद्यपद्ये तदनुकारे योगिनीहृदये च गणेश-ग्रह-नक्षत्र-राशिन्यासा इतोऽधिका दृश्यन्ते। नि. षो. द्वादशश्लोकी नारदीयपुराणे (१।८९। १०-२१) आनुपूर्व्या समुपलभ्यत इति चात्र विभावनीयम्।

१४. अत्र स्थलद्वये (२।२७, ५।२५) पूर्वसेवापदप्रयोगो दृश्यते। पुरश्चरणार्थे शब्दस्यास्य प्रयोगो बौद्धमतीये कृष्णयमारितन्त्रेऽपि (५।१९) क्रियते।

१५. तन्त्रालोके (३।१४६-१७२) काम-विष-निरञ्जनतत्त्वानि व्याख्याय— "इच्छा कामो विषं ज्ञानं क्रिया देवी निरञ्जनम्॥" (३।१७२) इति प्रकरणमेतदुपसंहियते। सोऽयं विषयो लुप्ता. उपो. (पृ. १८०-१८१) विवृतो द्रष्टव्यः। नि. षो. (५।१), यो. हृ. (२। २३) च कामविषशब्दौ संसारमोक्षवाचकौ, विज्ञानभैरवे (श्लो. १५१) चैतौ शब्दौ प्राणापानयोर्निदर्शकौ स्तः। प्रस्तुते ग्रन्थे केवलं कामतत्त्वं विचार्यते। अत्रत्यं कामस्थमित्यादिकं पङ्क्तित्रयं नि. षो. (४।४५-४६), परात्रीशिकाव्याख्यायामपि च (पृ. २२९) दृश्यते। अत्र (पृ. ३०) रुद्रयामलवचनत्वेन स्मृतं श्लोकद्वयमर्थरत्नावल्यां

हार्दं प्रकटयन् "सैषा परमरहस्यदीक्षा कथिता" (पृ. ३३) इति वदति। एवमेव योगिनीहृदयदीपिकाकारः परान्यासं संवर्ण्य— "अयमेव सम्प्रदायविद्भिर्देशिकैः पद्धतिषु परान्यास इत्युच्यते" (पृ. २७४) इत्याह। ईदृशेषु स्थलेषु सम्प्रदायविदो देशिकेन्द्रा एव शरणं नः। अथवा— "नातिरहस्यमेकत्र ख्याप्यम्, न च सर्वथा गोप्यम्" (तन्त्रसारे, पृ. ३१) इत्यभिनवगुप्तदृशा रहस्यपरिज्ञाने यत्नो विधेयः। कृते यत्ने विभिन्नेषु स्थलेषु विततं रहस्यं सम्यक् स्फुटीभवति।

अत्रत्या बिन्दुरात्मेत्यादिका पङ्क्तिः (३। ८) त्रिवेन्द्रंमातृकायां नास्ति, अत एव— "अत्र मतोत्तर इति नामदर्शनेन नैव स्यादयं मूलग्रन्थस्यांशः" इति संभावितमस्माभिस्तत्रत्यायां टिप्पण्याम्। पङ्क्तिरियं नैव व्याख्याता टीकाकारेणेत्यप्यत्र विभावनीयम्। पञ्च[१६]कामबीजानि समुद्धृत्यात्र पुनर्द्वितीयपटलोक्तमष्टारं त्रैपुरं यन्त्रं स्मर्यते, तल्लेखनप्रकारश्च प्रदर्श्यते। अपरं षोडशारं यन्त्रमप्यत्र समुद्धृतम्, तत्र वाग्भव-कामराज-शक्तिबीजेषु स्वरव्यञ्जनविन्यासप्रकारश्च प्रदर्शितः। अन्ते च द्विविधस्यापि यन्त्रस्य महिमानं संवर्ण्य केचन काम्याः प्रयोगा निदर्श्यन्ते।

चतुर्थः पटलः

अत्र पटलारम्भे देव्या चत्वारः प्रश्नाः समुपस्थाप्यन्ते। ते च सन्ति— विशेषविद्या कीदृशी, [१७]अक्षरार्थः कीदृशः, पादादि कीदृशम्, कुलचक्रं च कीदृ-

---

(पृ. २४२) त्रिपुरार्णववचनत्वेन स्मर्यते। इदमत्रावधेयम्— साम्प्रतं मुद्रिते त्रिपुरार्णवे नोपलभ्यते वचनमेतत्। श्रीविद्यार्ण- वादिषूद्धृतास्त्रिपुरार्णवश्लोका अपि तत्र न सन्तीति कुलार्णव-तन्त्रराज-कुलचूडामणि-रुद्रयामलादिवत् तस्यैव प्राचीनस्य तन्त्रस्य नूतनमेतत्संस्करणमथवा तन्त्राम्नैवापरमिदं तन्त्रमाविष्कृतम्। विद्यारण्य-विद्यानाथ-कविहस्तमल्लादिस्मृतस्त्रिपुरार्णवस्तु नाद्यावधि लोचन- पदवीमायातः। त्रिपुरार्णवचन्द्रिका काचन विवृता सूचीपत्रेषु। परीक्षणीयैषा मातृका प्रसङ्गेऽस्मिन्।

१६. पञ्चकामबीजानामुद्धारप्रक्रिया तेषां स्वरूपं च नि. षो. (४।४५-४६) चतुर्षु व्याख्यानेषु द्रष्टव्यम्। वामकेश्वरीमतविवरणे (पृ. ११५) जयरथेन स्मृतः कामस्थमित्यादिवचनविषयकः पूर्वाचार्यश्लोकश्चावलोकनीयः।

१७. योगिनीहृदये (२।१५-१६) भावार्थादयः षडर्था निर्दिश्यन्ते। तत्र भावार्थ एवाक्षरार्थ इति तस्य प्रक्रिया तत्रैव द्रष्टव्या। सा चात्रत्यां सरणिमेवानुकरोति।

शमिति। अत्र परा, अपरा, परापरा चेति त्रिविधा त्रिकविद्यैव [१८]प्रस्तारमहिता विशेषविद्येति निर्वर्ण्य तस्या वाग्वादिनी, भैरवी, यमराज्ञी, सौरा चेति चत्वारो भेदाः प्रदर्श्यन्ते, तासां विद्यानां स्वरूपं महिमा च निरूप्यते। अनन्तरं वाग्भव-कामराज-शक्तिबीजानां हंसमन्त्रस्य चाक्षरार्थं प्रदर्श्य तेषां लक्षणं माहात्म्यं च निरूप्यते। एवमक्षरार्थसंकेतं निर्वर्ण्य ततः परं भैरवो वाग्भव-कामराज-शक्ति-बीजानां पादादिसंकेतमुपदिशति, अन्ते चा पटलसमाप्ति कुलचक्रस्य स्वरूपं माहात्म्यं च निर्वर्णयति।

पञ्चमः पटलः

अत्र प्रथमतस्त्रिपुरा[१९]योगापराभिधानो हंसाख्यो योग आन्तरवरिवस्या-स्वरूपो निदर्श्यते। योगपीठं सादाख्यं परमेश्वरं नादबिन्दुकलामयीं मूर्तिं च प्रदर्श्य, देव्या ध्यानं च विस्तरेण निर्वर्ण्य, अमृताप्लावनयोगः समुपदिश्यते, तस्य माहात्म्यं च निरूप्यते। अत्र टीकाकारेण वाङ्मयी, ज्योतिर्मयी चेति द्विविधा त्रिकविद्या व्याख्याता। तद्यथा— "तत्र वाङ्मयी वर्णस्थानप्रयत्नाभिव्यङ्ग्या वैखरीस्वरूपा प्राणवृत्तिनिबन्धना भवति, नैव पादत्रयात्मना यथावन्निर्दिष्टा। ज्योतिर्मयीति नामाधारहृदयब्रह्मरन्ध्रमये गुहातीते क्रमादुदयलयविश्रामरूपानु-च्चाराच्च क्रमेण परा-मध्यमा-पश्यन्तीसंज्ञिता सदोदितस्वभावाऽध्यात्मभारती विद्या" (पृ. ५२-५३) इति। अत्र २२-२३ श्लोकयोः (पृ. ५५) जपप्रक्रिया वर्णिता। तत्र— "अक्षराक्षरसन्तानं निःसंदिग्धमना जपेत्" इति वचनं वीर-शैवीये सूक्ष्मागमे— "मन्त्रार्थं मनसा ध्यायन् वर्णाद्वर्णं पदात्पदम्" (३।४३), चन्द्रज्ञानागमे च— "धिया यदक्षरश्रेण्या वर्णाद्वर्णं पदात्पदम्" (८।५९) इत्यत्र विवृतं मानसं जपं स्मारयति।

---

१८. षट्साहस्रसंहिताख्यस्य कुब्जिकामतस्य परिशिष्टे प्रथमे प्रस्तारशब्दो गह्वरशब्दश्च महता डम्बरेण मुकुन्दराजविरचितसंवर्तार्थप्रकाशाख्यग्रन्थसाहाय्येन सचित्रं व्याख्यातो द्रष्टव्यः (पृ. १८१-२०९)।

१९. अत्र त्रिपुरायोगपदस्थाने त्रिपुरायाग(पृ. ६१)पदमपि प्रयुक्तं दृश्यते। तत्रान्तरवरिव-स्याप्रतिपादको भागो (५।१-२२) योगपदेन, बाह्यवरिवस्याप्रकाशकश्च (३।२३-४१) च यागपदेन परिचेयः।

एवंविधाया विद्याया भावनाप्रकारं परिज्ञातुं देवी मन्त्रध्याने उदयविश्राम-लयस्थानानि कानीति प्रश्नमवतारयति, भगवान् भैरवश्च [२०]आधारहृदयब्रह्मरन्ध्राख्यानि त्रीण्यपि स्थानानि उदयलयविश्रान्तिभाञ्जि सन्तीति प्रदर्शयति। अत्र आधारादिस्थानत्रयस्य स्वरूपम्, तत्र क्रमशो वाग्भव-कामराज-शक्त्याख्य-बीजानां[२१] ध्यानप्रक्रिया च वर्णिता भगवता। मन्त्रध्यानं निर्वर्ण्यात्र [२२]पूर्वसेवा (पुरश्चरण)प्रकारः पुनरपि संक्षेपेण प्रदर्शितः, आपटलान्तं बहवः काम्याः प्रयोगाश्च वर्णिताः।

षष्ठः पटलः

अत्र पटलारम्भे देवी [२३]नवलक्षविषयकं तत्स्थानविषयकं च प्रश्नं पृच्छति। नवलक्षं शरीरे संस्थितमिति संसूच्य भगवान् नवाधारान् तेषां स्वरूपं च संवर्ण्य मन्त्रसिद्धिलक्षणानि पञ्च सविशेषं निरूपयति, व्याख्याकारश्च कुब्जिकामतवचनानि समुद्धृत्य तानि विशदयति।

सप्तमः पटलः

अत्र देव्याः प्रश्नं विनैव भगवान् विद्याकोशं प्रवक्ष्यामीति प्रस्तौति। प्रथमं वाग्भवेन देव्याश्चक्रं पूजनीयमिति तत्क्रमोऽत्र प्रदर्श्यते। अष्टपत्रे मूलविद्या त्रिपुरभैरवी समुपास्येति तत्प्रकार उक्तः। उद्धारक्रमेण मूलविद्या जप्तव्येति

---

२०. अयमेव विषयो नि. षो. अर्थरत्नावल्याम् — "एवं वाग्भवरूपिण्याः शक्तेरुदयो मूलाधारे, मूलादिब्रह्मरन्ध्रान्तं व्याप्तिः, विश्रान्तिस्तु जिह्वाग्रे" (पृ. २३१), "अस्याप्युदयो मूलाधारे, भ्रूमध्यान्तं व्याप्तिः, विश्रान्तिर्ब्रह्मरन्ध्रे" (पृ. २४७) इत्यादिना प्रस्तावितः।

२१. योगिनीहृदयदीपिकायां (पृ. ३५९) वह्नि-सूर्य-सोमकुण्डलिनीषु वाग्भवकामराज-शक्तिबीजजपविधानमुखेन सेयं प्रक्रिया स्फुटीकृता।

२२. पूर्वसेवाविषये १४ संख्याका टिप्पणी द्रष्टव्या।

२३. हंसभेदप्रामाण्येन २७ तमे पृष्ठे लक्षशब्दस्य मास (त्रिंशदिनानि) इत्यर्थः कृतः। अत्र (पृ. ५८) च लक्षशब्द आधारपर्याय इति ज्ञातव्यम्, अग्रे नवाधाराणां प्रतिपादनात्।

तत्क्रमोऽप्यत्र टीकाकारेण सुस्पष्टं प्रतिपादितः। [२४]त्रिपुरभैरवी-त्रिपुरान्तकपदयोर्व्युत्पत्तिपुरस्सरं विद्यायाः स्थितिक्रमः संहारक्रमश्च प्रदर्शितः। एवं त्रिविधेन क्रमेण देव्या मूलमन्त्रस्य जापेन त्रिविधाऽष्टविधा च सिद्धिरवाप्यत इत्युक्त्वा—

न [२५]घोषात् परमो मन्त्रो न विद्या त्रिपुरापरा।
न गुरोः परमं दैवं न मुद्रा खेचरीपरा॥ (७।१७)

इत्याह भगवान् भैरवः। अत्र प्रतिपादितं ज्ञानमयोग्येभ्यो न दातव्यमिति वर्तते पारमेश्वरी आज्ञा। अत्रैव ग्रन्थोऽयं परिसमाप्यते।

अवधेया अंशाः

एवं च संक्षेपेणैतद्वक्तुं शक्यते यदत्रोत्तरषट्के प्रथमे पटले सप्त प्रश्नाः समाहिताः, योनिमुद्राबन्धस्तस्या माहात्म्यं च प्रदर्श्याभ्यासात्[२६] सर्वं सिद्ध्यतीति सुविचारितम्। द्वितीये पटले त्रैलोक्यडामरं यन्त्रमुद्धृत्य तत्र मातृकापीठभैरवयोगिनीविन्यासप्रकारो वाग्भव-कामराज-शक्तिबीजपूजाप्रकारश्च प्रदर्शितः। तृतीये पटले प्राधान्येन कामतत्त्वस्य स्वरूपं प्रदर्श्य पञ्चकामबीजानि चोद्धृत्य पुनरपि पूर्वोक्तबीजत्रयध्यानप्रकारो न्यरूपि। चतुर्थे पटले त्रिकविद्यां निरूप्य

---

२४. ऋजुविमर्शिन्यां त्रिपुरापदव्युत्पत्तिरेवं प्रदर्शिता वचनद्वयप्रामाण्येन—
त्रिमूर्तिसर्गाच्च पुराभवत्वात् त्रयीमयत्वाच्च पुरैव देव्याः।
लये त्रिलोक्या अपि पूरकत्वात् प्रायोऽम्बिकायास्त्रिपुरेति नाम॥
शिवशक्त्यात्मसंज्ञेयं तत्त्वत्रितयपूरणात्।
त्रिलोकजननी चाथ तेन सा त्रिपुरा स्मृता॥
अत्रत्यं प्रथमं वचनं प्रपञ्चसारे (९।२) द्वितीयं च प्रपञ्चसारविवरणटीकायां प्रयोगक्रमदीपिकायां (पृ. ५७१) धृतं द्रष्टव्यम्।

२५. घोषशब्दो ह्यस्मिंस्तन्त्रे हकारं नादं प्राणं चाभिप्रैति। भर्तृहरिणा वाक्यपदीयस्य ब्रह्मकाण्डस्य स्वोपज्ञवृत्तौ— "घोषिणी जातनिर्घोषा अघोषा च प्रवर्तते। तयोरपि च घोषिण्योर्निर्घोषैव गरीयसी॥" (पृ. २१८) इत्ययं श्लोकः स्मर्यते। अयं च श्लोको महाभारते आश्वमेधिकपर्वणि (२१।२१) समुपलभ्यते। अत्रत्यो घोषशब्दो वैखरीं वाचं परामृशति।

२६. "अभ्यासवैराग्याभ्यां तन्निरोधः" (१।१२-१४) इत्यादिना सूत्रत्रयेण महर्षिणा पतञ्जलिनाऽप्यभ्यासस्य वैशिष्ट्यं ख्याप्यते।

चतुर्विधा विशेषविद्या [२७]वाग्वादिनी-भैरवी-यमराज्ञी-सौराख्याः प्रदर्श्यन्ते, त्रिविधस्य बीजस्य हंसाख्यस्य मन्त्रस्य पादादिसंकेतं चाक्षरार्थं च निर्वर्ण्य [२८]कुलचक्रं संवर्ण्यते। पञ्चमे पटले हंसाख्यो योग आन्तरबाह्यवरिवस्यात्मकः संवर्णितः, आधारादिषु स्थानत्रयेषु बीजत्रयस्योदयलयविश्रान्तिरूपं ध्यानप्रकारं च प्रदर्श्य केचन काम्याः प्रयोगाश्च प्रदर्शिताः। षष्ठे नवाधाराणि मन्त्रसिद्धिलक्षणानि च पञ्च निर्दिष्टानि। अन्तिमे सप्तमे पटले पुनरपि विद्याकोशवर्णनप्रसङ्गेन वाग्भव-कामराज-शक्तिबीजानां सृष्टिस्थितिसंहारक्रमेण पूजाप्रकारो निरूप्यते। एवं च सम्पूर्णेऽपि ग्रन्थे त्रिपुरायन्त्रं त्रिपुराविद्या बीजत्रयात्मिका चोपास्यत्वेन प्राधान्येनात्र प्रतिपादितेति वक्तुं शक्यते।

प्रसङ्गवशादत्र टीकायां च नैके विषया विवृताः सन्ति। यथा चन्द्रद्वीपपदस्य द्वयोः स्थानयोः (पृ. ४, ३२) प्रयोगो दृश्यते। "विसर्गाधस्तथा परमिति विसर्गस्य रूपातीतस्याकुलाख्यस्य चन्द्रद्वीपस्य विभाग इत्यर्थः" (पृ. ४) इत्यत्र चन्द्रद्वीपशब्दोऽकुलाख्यं विसर्गं परामृशति, "विसर्गो नाम षोडशान्तं चन्द्रद्वीपं ब्रूयात्" (पृ. ३२) इत्यत्र च विसर्गपदेन षोडशान्तं पदमेव चन्द्रद्वीपपदेनोक्तम्। सेयं चन्द्रद्वीपपदस्याध्यात्मिकी व्याख्या। वस्तुतश्चन्द्रद्वीपं मत्स्येन्द्रनाथस्य सकलकुलशास्त्रावतारकस्य लीलाभूमिरिति कुलतन्त्रेषु वर्ण्यते।

एवमेवात्र कादिहादिभेदभिन्नाया उभयविधायास्त्रिपुराविद्यायाः समाहारः कृत इति टीकाकारो भणति (पृ. २७) "कलातन्त्रं शुक्लम्", "हकारस्तु स्मृतः प्राणः" इति वचनद्वयं स्मरन्। क्वत्यमिदं वचनद्वयमिति तु न ज्ञायते।

एवमेवान्येऽपि विषया यथायथं समुपस्थापिताः परिशिष्टधृतविशेषशब्दानुक्रमणीसाहाय्येन ज्ञातुं शक्यन्ते। अत्र पाठकानां सौविध्याय कुलदीपिकोद्धृतग्रन्थग्रन्थकारनामानि, उत्तरषट्कश्लोकार्धानुक्रमणी, कुलदीपिकाधृतवचनानुक्रमणी चेत्येतानि परिशिष्टानि स्थापितानि सन्ति। एतेषां सज्जीकरणे, पाठसंकलने, टिप्पणीसंयोजने च बद्धपरिकरेण श्रीमता डॉ. शीतलाप्रसाद-उपाध्या-

---

२७. वाग्वादिनी भैरवी च विद्या लघुस्तवेऽपि (श्लो. १८) स्मर्यते।

२८. कुलचक्रमेतत् कौलासनत्वेनार्थरत्नावल्यां नि. षो. टीकायाम् (पृ. १७१), गणेशत्वेन योगिनीहृदये दीपिकायां च (पृ. १९१), सुभगोदये च (पृ. २८७, नि. षो.) विवियते।

येन भूरि परिश्रान्तमिति स शुभाशीर्वादशतैः सभाज्यते । वस्तुतोऽस्य ग्रन्थस्य प्रकाशनमस्यैव समुद्योगस्य प्रतिफलमिति वक्तुं शक्यते ।

आभाराभिव्यक्तिः

सव्याख्यमुत्तरषट्कं ज्ञानदीपविमर्शिनी चेति ग्रन्थद्वयं सम्पूर्णानन्द-संस्कृतविश्वविद्यालये सांख्ययोग-तन्त्रागमविभागे प्राध्यापकस्य डॉ. शीतला-प्रसाद-उपाध्यायस्य साहाय्येन प्रकाशनार्थं सज्जीकृतमासीत् । तत्र सम्पूर्णानन्द-संस्कृतविश्वविद्यालयस्य पूर्वकुलपतिना पद्मश्रीविरुदालङ्कृतेन डॉ. विद्या-निवासमिश्रेण ज्ञानदीपविमर्शिनी प्रकाशनार्थमङ्गीकृता । सोऽयं ग्रन्थः शीघ्रमेव प्राकाश्यमेष्यति । वर्तमानकुलपतिभिः पद्मश्रीविरुदालङ्कृतैः श्रीमद्भिः प्रो. वि. वेङ्कटाचलम्-महोदयैस्त्ववशिष्टं सव्याख्यमुत्तरषट्कमपि प्रकाशनार्थमङ्गी-कृतम्, उभयोर्ग्रन्थयोर्मुद्रणाय च शोभना व्यवस्था कृता । तदर्थं भूयोभूयस्ते वर्धापनार्हाः । ग्रन्थसम्पादनकर्मणि पूर्ववदहं पुनरपि प्रवृत्तः स्यामिति वर्तते तेषां शुभा मतिः, किन्त्वस्यामतीतसप्तत्यामवस्थायामधुना गुरुचरणानां संकल्पो हिन्दीभाषायां सर्वमेतदुपस्थापनीयमित्याकारकः कथं नाम समूर्ततामानीयेतेति "शैव धर्म-दर्शन" इत्याख्यो ग्रन्थो न चिरादेव संदृब्धः स्यादिति वर्तते मनीषाऽस्माकम् । अत्र समेषां विदुषां शुभा भावना विघ्नसन्ततिनिवारकाश्च शुभाशीर्वादाः पाथेयभूताः स्युरित्येव भगवान् ज्ञानगुरुर्विश्वनाथ इच्छाज्ञानक्रिया-शक्तीनां समाहारं बिभ्रती माताऽन्नपूर्णा च स्मर्येते ।

अन्ते च प्रकाशनकर्मणि संलग्नाः सम्पूर्णानन्दसंस्कृतविश्वविद्यालये प्रका-शनाधिकारी श्रीमान् डॉ. हरिश्चन्द्रमणित्रिपाठी तत्सहयोगिनश्च, एवमेव मुद्रण-कर्मणि प्रवृत्तास्तारायन्त्रालयस्य स्वामी श्रीमान् रमाशंकरपंड्या तत्सहयोगिनश्च धन्यवादशतैः सभाज्यन्ते ।

■

संकेतसूची

अ. मृ.	अमृततन्त्रम्	नि. षो.	नित्याषोडशिकार्णवः
ई. प्र.	ईश्वरप्रत्यभिज्ञा	नि. षो. अ.	नित्याषोडशिकार्णव-अर्थरत्नावली
उ. कौ.	उत्तरकौलम्		
उ. ष.	उत्तरषट्कम्	पा. म.	पारमेश्वरमतम्
ऋ.	ऋग्वेदः	बृ. उ.	बृहदारण्यकोपनिषत्
ऐ. आ.	ऐतरेयारण्यकम्	भ. गी.	भगवद्गीता
ऐ. उ.	ऐतरेयोपनिषत्	मतो.	मतोत्तरम्
ऐ. ब्रा.	ऐतरेयब्राह्मणम्	मा. त.	मातृकातन्त्रम्
का. त.	कालतन्त्रम्	यो. दी.	योगिनीहृदयदीपिका
कु. म.	कुब्जिकामतम्	र. श्री.	रत्नाख्यं श्रीमतम्
कु. मू.	कुलमूलावतारः	रु. या.	रुद्रयामलम्
क्र. नि.	क्रमनिर्णयः	ल. स्त.	लघुस्तवः
ग. भा.	गणेशसहस्रनामभाष्यम्	वि. भै.	विज्ञानभैरवम्
गो. सं.	गोरक्षसंहिता	श्रीम.	श्रीमततन्त्रम्
च. स्त.	चर्चास्तवः	सि. म.	सिद्धयोगीश्वरीमतम्
ज्ये. ना.	ज्येष्ठनाथः	सूर्यता.	सूर्यतापनीयोपनिषत्
त्रि. ल.	त्रिपुराभारतीलघुस्तवः	स्व. त.	स्वच्छन्दतन्त्रम्
नि. का.	निश्वासकारिका	हं. भे.	हंसभेदः
नि. श्री.	निगूढं श्रीमतम्		

विषय-सूची

प्रस्तावना १-१५

संकेतसूची १६

ग्रन्थभागः

प्रथमः पटलः

कुलनायिकाया भैरवं प्रति सप्त प्रश्नाः १-३

लिङ्गत्रयस्वरूपनिरूपणम् ३-५

महापद्मवनलक्षणम् ५

कदम्बगोलकनिरूपणम् ५-६

ब्रह्मरन्ध्रस्वरूपनिर्देशः ६

मुद्रापञ्चकप्रस्तावः ७

पीठत्रयनिरूपणम् ८

कुलाकुलविभागकथनम् ८-९

योनिमुद्राबन्धनध्यानादिकम् ९-११

कुलशक्तेरकुलामृतपानम् १०-१२

मात्रायोगः १२

उद्घातलक्षणम् १२-१४

योनिमुद्राबन्धनफलम् १४

योनिमुद्राबन्धनेन सर्वे मन्त्रदोषा निवर्तन्ते १५

दीक्षितस्यैवात्राधिकारः १६

शिष्याय सुपरीक्षिताय मन्त्रोपदेशो विधेयः १७
अभ्यासात् सर्वं सिद्ध्यति १७

द्वितीयः पटलः

त्रैलोक्यडामरयन्त्रोद्धारविधिनिरूपणम् १८-१९
तत्र मातृकापीठभैरवयोगिनीन्यासप्रकारः १९-२२
पीठाष्टकभैरवाष्टकनामानि २०
कुलपद्धतिपूजनम् २२
वाग्भवध्यानं बीजोद्धारप्रक्रिया च २२-२४
कामराजध्यानं बीजोद्धारप्रक्रिया च २४-२६
शक्तिबीजध्यानं तदुद्धारप्रक्रिया च २६-२७
पूर्वसेवा (पुरश्चरण) प्रकारनिर्देशः २७

तृतीयः पटलः

कामतत्त्वविषयको देव्याः प्रश्नः २८
भैरवकृतं तत्समाधानम् (कामपञ्चकबीजोद्धारः) २८-३२
ब्लूंकारबीजध्यानं तत्फलं च ३२-३३
शक्तिबीजयन्त्रपूजान्यासहोमादिप्रकारः ३३-३७

चतुर्थः पटलः

कुलनायिकाया भैरवं प्रति चत्वारः प्रश्नाः ३८
विशेषविद्यासमुद्धारप्रक्रियानिरूपणम् ३८
त्रिकविद्याक्रमस्य तिस्रः शक्तयः ३८-३९
वाग्वादिनी-भैरवी-यमराज्ञी-सौराख्याश्चतस्रो विद्याः ३९-४१
अक्षरार्थोपदेशः (वाग्मव-कामराज-शक्तिबीजानाम्) ४१-४३

हंसमन्त्राक्षरार्थनिदर्शनम् ४३
मन्त्राणामुच्चारे क्रम आश्रयणीयः ४४
पादादिसंकेतोपदेशः ४५-४६
कुलचक्रप्रस्तारोपदेशः ४६-४८

पञ्चमः पटलः

त्रिपुरायोगाख्यान्तर्यागोपदेशः (हंसाख्यो योगः) ४९-५०
महेशान्या ध्यानम् ५१-५२
परामृतेन देवीमाप्लावयेत् ५२-५३
विद्याया उच्चारक्रमे उदयविश्रामलयस्थाननिर्देशः ५३-५४
ज्योतिर्मय्या विद्यायाः स्वरूपाभिधानम् ५४-५५
योन्यासनस्थितो योगी मन्त्रवरं जपेत् ५५
न्यासाहुत्यादिना पूर्वसेवा (पुरश्चरणं) कर्तव्या ५५
जपाहुत्यादिना विविधा काम्याः प्रयोगाः सिद्ध्यन्ति ५५-५७

षष्ठः पटलः

नवलक्षविषयको देव्याः प्रश्नः, तत्समाधानं च ५८
नवाधारनामानि तेषां स्वरूपं च ५८-५९
मन्त्रसिद्धेर्लक्षणपञ्चकम् ५९-६०

सप्तमः पटलः

विद्याकोशस्वरूपोपदेशः ६१
वाग्भवेन देव्याश्चक्रं प्रपूजयेत् ६१-६२
मूलविद्याजपोपदेशः ६२
मूलविद्या (त्रिपुरभैरवी) अक्षरानुपूर्वीकथनम् ६२

उद्धारक्रमानुसरणमावश्यकम् ६३-६४
त्रिपुरभैरवी-त्रिपुरान्तकपदयोर्निर्वचनम् ६४
स्थितिक्रमनिरूपणम् ६४-६५
स्थितिक्रमा विद्याऽन्यथोपदिष्टा चेन्न सिद्ध्यति ६५-६६
सृष्टिक्रमोपदेशः ६६
यथाशास्त्रं मूलविद्याजपेन त्रिविधाऽष्टविधा च सिद्धिरवाप्यते ६७
त्रिपुराविद्याप्रशस्तिः ६७
एषा विद्याऽयोग्येभ्यो न दातव्या ६७-६८

परिशिष्टभागः

कुलदीपिकोद्धृत-ग्रन्थग्रन्थकारनामानि ६९
उत्तरषट्क-श्लोकार्धानुक्रमणी ७०-७६
कुलदीपिकोद्धृत-श्लोकार्धानुक्रमणी ७७-७९
विशेषशब्दानुक्रमणी ८०-८८

■

उत्तरषट्कम्

कुलदीपिकाव्याख्यासहितम्

प्रथमः पटलः

वन्दे शक्तिं परां शम्भोर्वर्णसंक्लृप्तविग्रहाम् [१] ।
प्राणाद्यारामसंक्रीडानिरन्तरधुरन्धराम् [२] [३] ॥
आगमान्तरसंवाददर्शितार्थविनिश्चयाम् ।
व्याख्यामुत्तरषट्कस्य करोमि कुलदीपिकाम् ॥

भगवतश्चैतन्यात्मनस्त्रियम्बकभट्टारकस्य स्फुरणरूपिण्याः [४] सार्वकालिक-प्रपञ्चसर्गस्थितिसंहारसंक्रीडनपरायाः सोमसूर्यवह्न्यात्मकविश्वतैजसप्राज्ञपुर-त्रयसंधुक्षण्या वर्णकदम्बकसंकलितदिव्यमूर्तेः [५] परायाः शक्तेः परमोपान्तिक-साधनभूतस्य श्रीमति दक्षिणस्रोतसि **श्रीरुद्रयामले** निखिलजगद्रक्षणाय समुद्घोषितस्यापि [६] श्रीमत्काश्मीरसिद्धसम्प्रदायदरिद्रैरभागधेयैर्यथातथ्यापरि-ज्ञानात् स्वमनीषिकापरम्परया कुदेशिकैर्विप्लवतोपदेश्य(पदिष्टेति) श्रीमद्-**ब्रह्मानन्द**प्रकाशकभट्टारकपरमगुरुमुखागमसंवादप्रवादपुरस्सरं [७] **श्रीमदुत्तर-षट्कस्य कुलदीपिकाख्यं** विवरणमारभ्यते । तस्य तावदयमाद्यः श्लोकः [९] —

[1]**व्योमाम्बुजे सहस्रारे सितकेसरसंकुले ।**
तत्रासीनं महादेवमपृच्छत् कुलनायिका ॥१ ॥

इति । तत्र **व्योम**नाम आज्ञास्थानात् कोदण्डसंज्ञकादूर्ध्वं यच्छिरःकपाला-न्तरालम्, तत्र **यदम्बुजम**[१०]**कुलस्वरूपं** परमबिन्दुसंज्ञितम्, [११]**तद्व्योमाम्बुजम्** । तत्र

---

१. संक्षिप्त–म.। २. क्रीडां–त्रि.। ३. न्तांशु–त्रि.। ४. स्फुरद्रू–त्रि.। ५. मूर्तिः–म.। ६. तमु–म.। ७. षिकया–म.। ८. वास–त्रि.। ९. इतः परं त्रिवेन्द्रम्मातृकायां मूलग्रन्थस्य मङ्गलाचरणश्लोकद्वयं दृश्यते । तद्यथा– 'कङ्कोलिशोणं बिभ्राणामङ्के पङ्केरुहालयाम् । यङ्के वदन्ति दन्तीन्द्रं तं केवलमुपास्महे ॥ विद्युत्पुञ्जनिभां नमामि सततं प्राग्भारसूक्ष्मां गिरं मूर्त्या भग्नमृणालतन्तुनिभया निर्भिद्य लिङ्गत्रयम्। प्राप्योर्ध्वं च विसर्गभागमुकुलं पीयूषधारारसं पीत्वा विद्रुतविद्रुमद्रवमयीं शक्तिं परां कौलिकीम् ॥' इति। १०. जं कुल–म.। ११. 'तद्व्योमाम्बुजम् .... संकुल इति' नास्ति–त्रि.।

1. श्लोकोऽयं यो. दी. (पृ. ३०५) उत्तरपदनामपुरस्सरं स्मृतः ।

बिन्दोः किरण[ा] अराणि तेषां सहस्रम् अरसहस्रकम्। अरशब्देन दलान्यभिप्रैति। **सितकेसरसंकुल** इति। तत्र केसराणि षोडशकलामयानि, अमृतमयत्वात् सितानीति कीर्त्यन्ते। [१]उक्तं च **श्रीनिर्गुडे श्रीमते**—

षोडशारं महापद्मं कर्णिकायां शिरोपरि ।
कर्णिकायां स्थितं ज्ञानमकाराद्याः क्रियादले ॥
ताश्च षोडशभेदेन शक्तयः परिकीर्तिताः । इति ।

तत्रासीनमिति[२]। तत्रावस्थितस्य निरञ्जनसमाधिबलेन निरतिशयस्यात्मरूपमुपलभ्यमानमिति यावत्। [३]एवंविधसमाधिबललाभे वानति(वाऽति)योगिनः परमरहस्यार्थविज्ञानातिशये(यो) योगो भवति। एवंविधं देवदेवं **कुलनायिका** मातृत्रै(?त्री)श्वर्यपृच्छदिति वाक्यार्थः। इह केवल**तन्त्राणां** प्रश्नोपवर्णनमुत्तरव्याकरणारम्भणियत्का(म्भनियुक्तत्वा)त्तदनुरूपश्रो(श्लो)कविन्यासः कृतः, न तु परमार्थतः शिष्या सती परमेश्वरी देवदेवं देशिकं सन्तमनुयुङ्क्ते। न खलु पररूपे परमशिवभट्टारकस्य सकलविद्याधारभूतमातृकासिद्धायाः परायाः शक्तेश्च परस्परं भेदस्यैव संभावना, तथा गुरुशिष्यभावस्यापरिज्ञातार्थस्य प्रकाशनस्य वा। तथा च **रहस्योपनिषत्**—

[1]गुरुशिष्यपदे स्थित्वा स्वयं देवः सदाशिवः ।
[३]पूर्वोत्तरपदैर्वाक्यैस्तन्त्रं [४]समवतारयत् ॥इति ॥१ ॥

कथमपृच्छदिति—

भगवन् देवदेवेश भवनाशन भैरव ।
श्रोतुमिच्छामि देवेश देव्या मन्त्रविनिर्णयम् ॥२ ॥

---

१. 'उक्तं च .... तत्रासीनमिति' नास्ति–त्रि.। २. 'एवंविध .... समवतारयत्' इति नास्ति–त्रि.। ३. प्रश्नो–दी.। ४. आधारभेदतः–स्व.।

1. यो. दी. (पृ. ४) महास्वच्छन्दवचनत्वेन स्मृतोऽयं श्लोकः स्व. त. (८.३१) वर्तते।

इति । **देव्या** इति त्रिपुराया इत्यर्थः ॥२ ॥

अत्र[1] विमर्शनीयानर्थान् प्रश्नरूपेणोपसंगृह्य(ह्णा)ति —

लिङ्गत्रयसमायुक्तं महापद्मवनं तथा ।
कदम्बगोलकं चान्यद् ब्रह्मरन्ध्रं विशेषतः ॥३ ॥

मुद्रापञ्चकसंयुक्तं पीठत्रयसमन्वितम् ।
कुलाकुल[2]विभागं च सप्तमं कथयस्व मे ॥४ ॥

इति । **लिङ्गत्रयसमायुक्तं**[3] **महापद्मवनम्**इत्यत्र समायुक्तपदे निहितेऽप्युभयं पृथक् पृथक् प्रश्नविषयभूतमित्यवगन्तव्यम्, अन्यथा सप्तप्रश्नानुपपत्तेः । समायुक्तपदं तु निदधानेन लिङ्गत्रयान्यतमेन महापद्मवनस्य सन्निकर्षं सूचयति । एवमुत्तरत्रापि बोद्धव्यम् ॥३-४ ॥

[1]पश्चिमाभिमुखं लिङ्गं योनिस्थं परिकीर्तितम् ।
हृदग्रन्थिबिन्दुसंस्थानं स्वयम्भूर्बाणवाचकम् ॥५ ॥
इ[4]तरं चान्तरालस्थं विसर्गाधस्तथा परम्[4] ।

इति । **पश्चिमाभिमुखम्** अधोमुखमित्यर्थः । **योनि**[5]**रिति वर्ण**[6]**विन्यास**विशेषः "गुदमेढ्रान्तरे"(१.१२) इत्यादिना वक्ष्यमाणलक्षणः । तत्रस्थमेकं लिङ्गम् । तच्च पिण्डाख्यम् । **हृदग्रन्थिबि**[7]**न्दुसंस्थान**मिति । तत्र ग्रन्थयो नाम मुद्रामण्डल मन्त्रविद्याख्याश्चत्वारः । ते च आदित आरभ्य मातृकाचक्रस्य द्वादशभिर्द्वादशभि[8]-

---

१. "अत्र .... संगृह्णाति" नास्ति-त्रि.। २. कुलकभा-त्रि.। ३. 'लिङ्गत्रय .... नुपपत्तेः' नास्ति-त्रि.। ४. 'इतरं .... परम्' नास्ति-त्रि.। ५. रत्र-त्रि.। ६. 'विन्यास' नास्ति-त्रि.। ७. बीज-म.। ८. 'द्वादशभि' नास्ति-म.।

1. "पश्चिमाभिमुखं लिङ्गं योनिस्थं परिकीर्तितम् । स्वयम्भूर्बाणलिङ्गं वा इतरं वापि सुव्रते ॥" इत्ययं पाठोऽर्थरत्नावल्यां (नि. षो., पृ. २७०) समुपलभ्यते । अयमेव पाठः समुचितः प्रतिभाति, ग्रन्थस्यास्य लिङ्गत्रयप्रतिपादकत्वात् । सार्धस्यास्य श्लोकस्याभिप्रायो योगिनीहृदयदीपिका(१.४४-४७)साहाय्येनावगन्तव्य इति ।

वर्णैश्चतुर्धा विभक्तस्य क्रमात्[1] संज्ञा वेदितव्याः। तथा च[2] **श्रीमते** श्रीचक्रनिर्णये देवे—

मणिपूरकमालायां ग्रन्थिर्जाता चतुर्विधा ।
मुद्रामण्डलमन्त्राश्च[3] विद्या ग्रन्थिश्चतुर्विधा ॥
(कु.म.११.२०-२१; गो.सं.१६.२६)

एकैका[4] द्वादशैर्भेदैर्माया[5] यन्त्रोदरे[6] पुनः ।
महामाया पुनर्देवी[7] द्वाभ्यां[8] मालाचतुष्टयम् ॥
अनाचाराच्च[9] सा सृष्टिर्[10]वर्णाचाराच्च जायते ।इति ।

ते च हृदये वर्तमाना हृदय[11]ग्रन्थयः। तन्मध्ये बिन्दुरात्माऽभिधेयस्तिष्ठति। तथा **श्रीमते**[12] — "परबिन्दुः[13] समाख्यातो हृत्पद्मे सुर[14]नायिके" (कु. म. ४.५१) इति। तत्रस्थं द्वितीयं लिङ्ग[15]म्। तच्च पदसंज्ञम्। **अन्तरालस्थं** तृतीयं लिङ्गं। तत्र प्रथम[16]ं लिङ्गं स्वयम्भु[17]संज्ञकम्। द्वितीयं[18] बाणाख्यम्। **इतरं चान्तरात्लस्थं विसर्गा[ध] स्तदा(था) पर**मिति। अत्रेतरशब्देन तृतीयं लिङ्गं[20] विवक्षितम्। तस्य तु संज्ञा परमिति। तद्रूपाभिधेयं चान्तरालस्थमित्यन्ये। अन्यतृतीयलिङ्गस्य मुखमण्डलस्य अन्तराल इति संज्ञा। विसर्गाधस्तथा परमिति विसर्गस्य रूपातीतस्याकुलाख्यस्य चन्द्रद्वीपस्य विभाग इत्यर्थः। अनेन[21] तृतीयलिङ्गस्थानलक्षणमपि दर्शयति। तच्च भ्रूमध्यादधोऽनुस्वारोत्पत्तिभूमिर्नासिकामूल-

---

१. क्रमान्तरा-म.। २. 'च .... देवे' इत्यस्य स्थाने 'चोक्तम्' इति-त्रि.। ३. मण्डलं मन्त्रविद्याश्च मुद्रा-कु.। ४. पङ्क्तित्रयं न दृश्यते-कु.। ५. मार्या-म.। ६. मन्त्रो-म.। ७. देंवि-त्रि.। ८. विद्याभ्यां-म.। ९. अनाहतात्तु-म.। १०. दृष्टि-म.। ११. मातृ-म.। १२. चोक्तम्-त्रि.। १३. परं-कु.। १४. निर्मिते-त्रि.। १५. 'लिङ्गम्' नास्ति-म.। १६. प्रथम-म.। १७. संज्ञित(म्)-त्रि.। १८. बिन्दुत्रयं-म.। १९. 'इतरं .... परमिति' नास्ति-त्रि.। २०. 'लिङ्गं .... इत्यर्थः' इत्यस्य स्थाने "लिङ्गस्थानस्य मुखमण्डलस्यान्तरालमिति च संज्ञेति प्रतिपादयति। तदुक्तं श्रीक्रमनिर्णये श्रीमते — 'मुखमण्डलं तच्चान्तरालसम्मतम्' इति। विसर्गाध इति। विसर्गस्वरूपस्यातीतस्याकुलाख्यस्या चन्द्रद्वीपस्यावाग्भव इत्यर्थः" इति-म.। २१. 'अनेन .... मानत्वात्' नास्ति-त्रि.।

मित्यवने(से)यमिति । इति लिङ्गानि कथिता[नि] । तानि पिण्डपदरूपाख्यानि । कथमिति ? योनिहृद्ग्रन्थिबीजाख्यस्थानकानां पिण्डपदरूपाण्य(णी)तरेणान्येषां संभाव्यमानत्वात्[११] । इह च योन्यादिस्थानाश्रयतयैव लिङ्गनामपि प्रतिपाद्यमानत्वात् पिण्डपदरूपाण्येव स्वयम्भूबाणप(णेत)रशब्दवाच्यानि लिङ्गान्यपीत्यर्थबलादवगन्तव्यम् । पिण्डपदरूपाणि[१] **श्रीमतोत्तरे** कथितानि —

[1]पिण्डं कुण्डलिनी शक्तिः पदं हंसः प्रकीर्तितः ।

रूपं बीजं[२] समाख्यातं रूपातीतं परात्परम् ॥ (कु.म.१८.१११-११२)

अत्र[३] बीजमनुस्वारः ॥५ $\frac{१}{२}$ ॥

महापद्मवनं चात्र योगपीठं प्रकीर्तितम् ॥६ ॥

महापद्ममेव वनं **महापद्मवनम्** । महापद्मस्य[४] प्रभासहस्रप्ररोहनिरन्तरतया वनाकृतिरश्मि(श्मि) मन्यमानो वनमिति कथयति । **अत्रेति** प्रकृतस्य परलिङ्गस्य परिसर इति सामान्यनिर्देशेऽपि तस्योपरिष्टादिति विज्ञेयम् । अत्र महापद्मं विसर्गाख्यमकुलं रूपातीतम् । तच्च परमबीजस्वरूपं[५] परमादित्यात्मक[६]ज्योतिर्मण्डलम् । तदेव **योगपीठमिति** संज्ञितं तूष्णीशनाथस्य परमभैरवभट्टारकस्य स्थानम्[७] ॥६ ॥

अथ कदम्बगोलकमाह —

[2]कदम्बगोलकाकारं तत्कामं[८](म)बीजरूपिणम् ।

---

१. 'पिण्ड .... कथितानि' इत्यस्य स्थाने 'तथा चोक्तम्' इत्येव–त्रि.। २. बिन्दुं–त्रि., बिन्दुः–कु.। ३. 'अत्र बीजमनुस्वारः' नास्ति–त्रि.। ४. 'महापद्म .... कथयति' इत्यस्य स्थाने 'तत्प्रमाणां बहुत्वात्तस्य वनतः' इति–त्रि.। ५. परबिन्दु–त्रि.। ६. 'क' नास्ति–म.। ७. 'स्थानम्' इत्यस्य स्थाने 'स्थानकमिति कृत्वा' इति–म.। ८. त्कालं–त्रि., तं कामं–अ.।

1. यो. दी. (पृ. ५९) स्वच्छन्दसंग्रहवचनत्वेनोद्धृतः । तत्रापरार्धस्य— 'रूपं बिन्दुरिति ख्यातं रूपातीतं तु चिन्मयम्' इति पाठः ।

2. नि. षो. (अ. पृ. २३१) उद्धृतेयं पङ्क्तिः । अत्र—'सर्वनाड्युद्गमस्थानं कदम्बकुसुमाकृति । परितः संवृता ताभिर्हृदि काऽप्यस्ति देवता ॥' इति भास्करराययीयं ग. भा. (खद्योत)वचनं स्मरणार्हम् ।

इति । कदम्बगोलकं विद्यादिति विशेषः । **तत्कामबीजमिति** तच्छब्देन महापद्मवनं परामृश्यते । तस्य मध्यं कर्णिकास्थानीयमन्तर्गततत्रिकोणं षट्कोणं कैलासप्रस्ताररूपमूर्ध्वं कामतत्त्वयन्त्रात्मकं वह्निमण्डलं तत्कामशब्दवाच्यम्, कदम्बगोलकाकारत्वात् । कदम्बगोलकं पिण्डविकारमिति वाक्यार्थः । तदा(था) चास्मिन् **तन्त्रे** कामशब्देन वह्निमभिधास्यति —

"भ्रमद्योनिगतं ध्यात्वा कामं बन्धूकसंनिभम् ।
ज्वलत्काला[नल]प्रख्यं तटित्कोटिसमप्रभम् ॥
तस्योर्ध्वे तु शिखा सूक्ष्मा" (१.१३-१४) इति ।

बीजरूपिणमिति क्रोडीकृतपरबीजस्वरूपिणमित्यर्थः । उक्तं च श्रीमद्**उत्तरकौले** — "व्यापकं परमं बीजं लयातीते व्यवस्थितम्" इति । अत्र लयातीतशब्देन ब्रह्मरन्ध्रमभिधीयते । तच्च महापद्मवनकर्णिकामध्यम् ॥६ $\frac{१}{२}$ ॥

अनन्तरं ब्रह्मरन्ध्रं वर्णयति —

ब्रह्मरन्ध्रं तु तत्रैव सुषुम्नाधारमण्डलम् ॥७॥

इति । **तत्रैवेति** कदम्बगोलक एवेत्यर्थः । सुषुम्नाया आधारभूतं मण्डलं **सुषुम्नाधारमण्डलम्** । तत् किल चान्द्रमसं मण्डलमाधारीकृत्य सुषुम्नादेहमनुसृता सुषुम्नेत्याख्याता काचित् कला, तस्या आधारभूतं मण्डलम् । तथा च **श्रीमते**—

एवमस्ते ध्वनिमासावसाने तु चिदचिद्रतम् ।
या चिनोति परानन्दिदाशिवान्तावभासति ॥
ब्रह्मसूत्रेति सा ज्ञेया तेन सूत्रेति कथ्यते । इति ॥७॥

---

१. 'पद्म' नास्ति–म.। २. ध्यकण्ठिका–त्रि.। ३. र्ध्व–त्रि.। ४. तत्त्वमयमन्त्रा–त्रि.। ५. 'पिण्ड .... मिति' इत्यस्य स्थाने 'विद्यादिति' इत्येव–त्रि.। ६. बिन्दु–त्रि.। ७. कोटीकृतपरबिन्दु–त्रि.। ८. 'उक्तं .... कौले' इत्यस्य स्थाने 'तदुक्तं' इत्येव–त्रि.। ९. व्यापकः परमो बिन्दुर्लयातीते व्यवस्थितः–त्रि.। १०. कण्ठिका–त्रि.। ११. अथ–त्रि.। १२. भूत–म.। १३. या चित्काचित्–म.। १४. भूम–म.। १५. 'तथा .... इति' नास्ति–त्रि.।

अथ मुद्रापञ्चकं प्रस्तौति —

पृथिव्यादीनि तत्त्वानि मुद्राणां वाचकानि तु ।

इति । तत्त्वस्वरूपमुद्राणां **तत्त्वानि** वाचकरूपाणि **पृथिव्यादीनि** न तु वाच्यरूपाणि । तानि च क्रमादाधारस्वाधिष्ठानमणिपूरकानाहतविशुद्ध्याख्य-स्थानगतानि[1] लकारवकाररेफयकारघोषाख्यानि[2] बीजानि, तेषु[3] चाधारादिस्थानेषु तत्तदाश्रग(गाँ)ल्लकारादीन् भावयतां साधकानां या विभूतयन्(यः) सिद्ध्यन्ति, ता मुद्रा इत्यभिहिताः । तदुक्तं[4] **श्रीक्रमनिर्णये** —

क्रमं च विरजं प्रोक्तं वच्मि मुद्रास्वरूपकम् ।
भूम्यादौ वाचकास्तत्र ल व र य (याः) चाद्यस्थिता[:] ॥इति ।
आधारादिविशुद्ध्यन्तं पृथिव्यादि(दी)ह पञ्चकम् ।
स्वभावितं(वतः) चलं दीप्तं स्थिरं मूलं नमोयुतम् ॥
माया यंबीजनादाद्य(ढ्य)मेतद्बीजं परात्मकम् ।
ह य व र ल संयुक्तं मायाधस्तात् समि(म)न्वितम् ॥
ब्रह्मस्थानगता[:] सूक्ष्मा[:] स्वाभाविकमुदाहताः ।
विष्णुस्थाने जलाः प्रोक्ता दीप्ता रुद्रपदं गता[:] ॥
ईश्वरे स्थिरसंज्ञा सा सादाख्ये रुद्रव[द्] ध्रुवा ।
समभावा" इति ।

एवमेतासां मुद्राणां भावनाद्वारेण विभूतिविशेषकारणभूततया लकारादय एव मुद्रा इति चाध्यारोपिताः[5] ॥७ १/२ ॥

---

१. गानि–म.। २. 'वकाररेफ' नास्ति–म.। ३. 'तेषु .... सिद्ध्यन्ति' इत्यस्य स्थाने 'आधारादिस्थानेषु लकारादीनव्यापयतां वा विकृतया सिद्ध्यन्ति' इति–त्रि.। ४. 'तदुक्तं .... मुद्रा इति' नास्ति–त्रि.। ५. रोपणम्–त्रि.।

अथ पीठत्रयमाह —

[1]पूर्णाख्यं बैन्दवं [2]तत्त्वं कोदण्डद्वयमध्यगम् ॥८॥
तदूर्ध्वे नादनाम्ना तु ओड्याणं तु भवेत्ततः ।
[3]कामरूपं भवेच्छक्तिः

[4]इति । [5]अत्र **बैन्दवं तत्त्वं** प्रकाशमयं भ्रूमध्यगं पूर्णगिर्याख्यं पीठमित्यर्थः । तस्योर्ध्वे नादाख्यं द्वितीयमोड्याणपीठम् । [6]तच्च प्रकाशरूपस्य बिन्दोः शिखात्मन[:] [7]स्फुरणरूपम् । **तत** इति । [8]तस्माद् द्वितीयपीठादूर्ध्वं [9]शाक्तं प्रकाशविश्रामरूपं [10]कामरूपं नाम तृतीयं पीठम् । तदेव **शक्तिः** कथिता इति ॥८$\frac{1}{2}$॥

पीठत्रयं व्याहृत्य कुलाकुले विभजति —

विसर्गमकुलं प्रिये ॥९॥
[11]सहस्रारं महापद्मं रक्तकिञ्जल्कशोभितम् ।
तत्र[12] संलक्षयेत् सम्यग् वर्षन्तं रक्तबिन्दुभिः ॥१०॥

इति । तस्याः शक्तेरुपरि **सहस्रारं [13]रक्तकिञ्जल्कशोभितम्** । लिङ्गत्रयविवरण[14]प्रकरणे व्याकृ[15]तं षट्कोण[16]कर्णिकं यन्महापद्मवनम्, [17]तन्मध्ये ब्रह्मरन्ध्रोक्त(त्थ)बिन्दुभिः प्रभानिष्यन्दमयै**र्वर्षन्तं** चान्द्रमसं तेजोऽतिशय **विसर्गाख्यं** तारकविशेषमकुलं लक्षयेत्, भावयेदित्यर्थः । [18]तथा च वक्ष्यति —

---

१. संपूर्णाख्यं–त्रि.। २. त्वर्थं–त्रि.। ३. क्तिर्विश्रामं तु ततः परम्–म.। ४. इतः परं 'ह्रींशब्दलोपोऽत्र द्रष्टव्यः' इत्यधिकं–म.। ५. 'अत्र' नास्ति–म.। ६. तस्य–म.। ७. स्फुरद्रूपम्–त्रि.। ८. न च–म.। ९. बैन्दव-त्रि.। १०. विश्रम–त्रि.। ११. पङ्क्तिरेषा नास्ति–त्रि.। १२. तत्रस्थं लक्ष–त्रि.। १३. शक्ति–म.। १४. 'विव .... रणे' इत्यस्य स्थाने 'विवरणे' इत्येव–त्रि.। १५. व्याकृतषट्को–त्रि.। १६. र्णिको–म.। १७. 'तन्मध्ये .... विसर्गाख्यं' इत्यस्य स्थाने 'तन्मध्यगेन्दुब्रह्मरन्ध्राक्षरत्क्षरितरक्तबिन्दुभिः प्रभानिष्यन्दमयैर्वर्षन्तमपि चान्द्रनकासं तेजोऽतिशयं सर्गाख्यं' इति–म.। १८. 'तथा .... कुलं' नास्ति–त्रि.।

द्रुतं(त)रक्तं स(सु)तेजाख्यं(ढ्यं) धारापातप्रवर्षिणम् ।

पीत्वा कुलामृतं दिव्यमिति तच्चाकुलं सदा ॥(१.१६-१७)

सृष्टिस्वभावत्वाद्विसर्ग इति कथितम्। ततोऽभिसृज्यमानमिच्छादिमातृकान्तकुलचक्रमयशक्तिकदम्बकं प्रतार(य)ते। उक्तं च **श्रीकुलमूलावतारे**—

इच्छा तत्रा(त्र) क्रियाख्याता कुण्डली मातृका तदा ।
ततः सर्वं समुत्पन्नं तस्माद् बहुविधं कुलम् ॥इति ॥१० ॥

अकुलं विसर्गाख्यं मन्त्रविशेषमुपदिश्य योन्याख्यं कुलस्वरूपं व्यावर्णयति —

पूर्वं या सूचिता मुद्रा गुह्याख्याऽमृतरूपिणी ।
बन्धं तस्याः प्रवक्ष्यामि संवित्तिं लभते यया ॥११ ॥

इति। पूर्वं लिङ्गत्रयविवरणप्रकरणे "पश्चिमाभिमुखम्" (१.५) इत्यादिना प्रथमलिङ्गधारत्वेन गुह्याख्या योन्याख्या या सा **मुद्रा सूचिता**, सकलमातृकाचक्रप्रसवित्री समस्तमन्त्रबलभूता प्राणस्वरूपा घोषमयी, **तस्या बन्धनमप्रमादमनुसन्धानलाभं वक्ष्यामि**। येन सारस्वतयोगभूतेन **परसंवित्तिलाभो** भवतीति यावत् ॥११ ॥

अथ बन्धप्रकारमाह —

आदौ पूरकयोगेन स्वाधारे योजयेन्मनः ।

---

१. 'व्यं पुनरेव विशेत् कुलम्। पुनरेवाकुलं गच्छेत्' इति तत्रत्यः पाठः। २. 'सृष्टि ....त्वाद्वि' इत्यस्य स्थाने 'सृष्टिं च भादत्वाद्वि' इति–म.। ३. ऽभिविसृ–म.। ४. न्तमयकुल–म.। ५. कः प्रदायत–त्रि.। ६. 'उक्तं .... कुलम्' नास्ति–त्रि.। ७. 'कुलं ... .मन्त्र' इत्यस्य स्थाने 'कुलमत्र' इति–त्रि.। ८. वर्णयति–त्रि.। ९. यथा–त्रि.। १०. 'विवरण' नास्ति–त्रि.। ११. 'या सा' नास्ति–त्रि.। १२. 'चक्र' नास्ति–त्रि.। १३. स्वरूप–त्रि.। १४. बन्धमप्राणमनु–म.। १५. भूतो रसवित्ति–त्रि.।

इति । प्रथमं तावत् पूरकयोगं[१] कृत्वा स्वाधारे मनो योजयेत्[२] । अनन्तरं च स्वाधारमाह । उक्तं[३] च निश्वासकारिकायाम्[४] —

यद्वैन्दौ(द्विन्द्वा)दौ भवेद्बीजमेको योनिः क्षस्य(रा)न्तकः ।
आभ्यामुभयसंयोगात् सम्बन्धं वेदमक्षरम्　　॥इति[५] ॥११ $\frac{१}{२}$ ॥

[1]गुदमेढ्रान्तरे योनिस्तामाकुञ्च्य[६] प्रबन्धयेत्[७] ॥१२ ॥

इति । तां[८] प्रबन्धयेत्[९] । किं कृत्वेति ? आकुञ्च्य, योनेराधारभूतं स्थानं बलादूर्ध्वमाकृष्येति यावत्[१०] । उक्तं च श्रीमतोत्तरे—"स्फुरन् वाधारकुञ्जनामि च" । अस्मिंस्तन्त्रे[११] आधारं गुदमित्युक्तमिति[१२] । तदुक्तं रत्नाख्ये[१३] श्रीमते पिण्ड-योगप्रकरणे — "गुदामाकृष्य[१४] कर्तव्या" इति ॥१२ ॥

तस्मिन् स्वाधारयोगेन[१५] मनसा किं भावनीयमित्याह—

भ्रमद्योनिगतं ध्यात्वा कामं बन्धूकसन्निभम् ।
ज्वलत्कालानलप्रख्यं तटित्कोटिसमप्रभम् ॥१३ ॥

इति । भ्रमत् स्पन्दमानम् । कामशब्दो रहस्यागमेषु देहाभ्यन्तरगते[१६] जात-वेदसि निरूढः[१७] । तच्च कामतत्त्वसंज्ञितं व्याकरिष्यमाणं चक्रस्वरूपम् ॥१३ ॥

स्वाधारगतमेवंविधतेजोविशेषं[१८] भावयित्वा तस्य[१९] शिखया सहितमात्मान-मपि भावयेदित्याह —

---

१. पूरकं–त्रि.। २. तच्च–त्रि.। ३. 'उक्तं .... इति' नास्ति–त्रि.। ४. योनिस्थानमा–म.। ५. 'प्र' नास्ति–म.। ६. 'तां .... येत्' नास्ति–त्रि.। ७. वायु–त्रि.। ८. 'यावत् .. .. त्युक्तमिति' नास्ति–त्रि.। ९. 'रत्नाख्ये श्रीमते' नास्ति–त्रि.। १०. गुदमाक्रम्य प्रवर्तयिता–म.। ११. धारे योजितस्य मनः–त्रि.। १२. 'न्तरगते' इत्यस्य स्थाने 'न्तरे' इत्येव–त्रि.। १३. निगूढः–त्रि.। १४. 'मेवं .... विशेषं' इत्यस्य स्थाने 'मेवम्, तैर्विशेषैः' इति–त्रि.। १५. तस्याः –त्रि.।

1. ~~गुदमेढ्रान्तरे योनिस्तामाकुञ्च्य प्रबन्धयेत्~~ (१२+१३=147)

तस्योर्ध्वे तु शिखा सूक्ष्मा चिद्रूपा परमा कला ।
तया सहितमात्मानमेकीभूतं विचिन्तयेत् ॥१४॥

तस्य जातवेदस **ऊर्ध्वं** तदीया **शिखा** चैतन्यमयी **कला**, तदवयवभूता या शिखा, **तया सहितं** तदेकतामापन्नम**ात्मानं** च भावयेदित्यर्थः ॥१४॥

[1]एवं भावयित्वा किमन्यद् भावनीयमित्याह —

गच्छन्ती[2] ब्रह्ममार्गेण लिङ्गभेदक्रमेण तु[3] ।
सूर्यकोटिप्रतीकाशं चन्द्रकोटिसुशीतलम् ॥१५॥
अमृतं यद्विसर्गस्थं परमानन्दलक्षणम् ।
द्रुतरक्तं[4] सुतेजाढ्यं धारापातप्रवर्षिणम् ॥१६॥
पीत्वाऽकुलामृतं[5] दिव्यं पुनरेव विशेत् कुलम् ।
पुनरेवाकुलं गच्छेत्

इति । **गच्छन्तीति**[6] प्रथमार्थे द्वितीयेयम् । **ब्रह्ममार्गेणेत्या**[7]**धारादि**-विशुद्ध्यन्तस्थानानुपूर्वे(र्वी) कथ्यते । [8]उक्तं च **निगूढे श्रीमते** —

पातालाख्यं तु यद्वक्त्रमधोमार्गावलम्बनम् ।
जगत्सृष्टिनिमित्तार्थं शक्तित्वे परिकल्पितम् ॥

एवं शक्तिरधोभागे ऊर्ध्वेभागं(गे) शिवं विदुः ।
ध्यात्वा मु(उ)भयवर्गे तु संस्थितं सिद्धिपञ्चकम् ॥

सद्यो वाममघोरं च पुरुषेशानमेव च ।
विशुद्धं पश्चिमं ज्ञेयमुत्तरं च अनामयम् ॥

---

१. भावभावयित्वा मन्वद्–म.। २. न्ति (न्तं)–म.। ३. तम्–त्रि.। ४. कृत–त्रि.। ५. परा–त्रि.। ६. च्छन्त–म.। ७. 'आधारा .... थ्यते' इत्यस्य स्थाने 'मध्यन्तस्थानानुपूर्वी कल्प्यते' इति–त्रि.। 'उक्तं .... इति' नास्ति–त्रि.।

दक्षिणं तु मणिर्नाम स्वाधिष्ठानं तु पूर्वकम् ।
कूर्मरूपमधोवक्त्रमाज्ञा चैशानविग्रहम् ॥इति ।

लिङ्गानि पूर्वोक्तानि स्वयम्भूप्रभृतीनि[१]। एवमात्मा[२] सनादा[३] सा शिखा लिङ्गानि[४] क्रमेण भित्वा ब्रह्ममार्गेणोर्ध्वं याता **सूर्यकोटिभास्वरं चन्द्रकोटिसुशीतलं** च त्रिकोणान्तवि(र्वि)सर्गमध्यस्थितपरमानन्दमूर्तिलक्षणं[६] **द्रवद्रूपमरुणं**[७] **तेजस्वि** रक्तबिन्दुधारापातप्रवर्षस्वभावम् **अकुलं**[८] परव्योमसंभवतया[९] **दिव्यममृतं पीत्वाऽऽचूष्य**[१०], **पुनरेव** तेन मार्गेणाधोमुखी **कुलाख्यं** योन्याधारं **विशेत्**। प्रविश्य च सा **पुनरेवोर्ध्वमुखेन मार्गेण विसर्गस्थमकुलं** विशेत् ॥१५-१६ $\frac{१}{२}$ ॥

मात्रायोगेन नान्यथा ॥१७॥

इति। **मात्रेति** बिन्दुनादशक्त्याख्यं क्रमादाज्ञास्थानललाटमध्यतदुपरिभागस्थानं[१२] पीठत्रयमभिसन्दधाति[१३]। तदुक्तम्— "बिन्दुर्नादस्तथा शक्तिर्मात्रात्रयमुदाहृतम्" इति। तेनायमर्थः — यथोक्तप्रकारेणोर्ध्वं यान्ती सा शिखा परलिङ्गस्थानान्नासामूलादूर्ध्वं बिन्दुनादशक्तिसंज्ञेन पीठत्रयेण युज्यमाना तच्च क्रमाद् भिन्दती अकुलं विशेत्। निविश्य च पुनस्तेनैव मार्गेणाधोमुखं व्रजन्ती योन्याधारं विशेदित्यर्थः। अतो[१४] न ब्रह्ममार्गस्थानेन[१५] लिङ्गभेदमात्रपर्यवसायिनी[१६]त्यवसेयम्। अत्र विशेदित्येतावन्मात्रेऽभिहितेऽपि तामेवंविधां[१७] शिखां भावयेदिति तात्पर्यार्थोऽवगन्तव्यः ॥१७॥

सा च प्राणः[१८] **समाख्याता तन्त्रेऽस्मिन् परमेश्वरी(रि)** ।
उद्घातः प्रोच्यते सोऽपि[१९] **प्राणान्तं स्पृशते यदा ॥१८॥**

---

१. प्रकृतिनी(तीनि)–म.। २. मात्म–त्रि.। ३. नाथा–त्रि.। ४. ङ्गादि–त्रि.। ५. पूर्वोदित–त्रि.। ६. 'मूर्ति' नास्ति–त्रि.। ७. कूपमकुलं–त्रि.। ८. अकुल–म.। ९. सकल–त्रि.। १०. ऽऽप्लुत्य पुनरेवं मार्गेणा–त्रि.। ११. रेव तेन मार्गेणोर्ध्वमुखी–म.। १२. रि स्थानस्य पीठ–म.। १३. भिदधाति–त्रि.। १४. अनेन–म.। १५. गयान–त्रि.। १६. यीत्य[व]सेयम्–त्रि.। १७. तामेव शिखां–त्रि.। १८. प्राणसमा–त्रि.। १९. सो हि प्राणान्त्यः–त्रि.।

इति[1]। सेति शिखां परामृशति। सा[2] अस्मिन्**स्तन्त्रे**[3] **प्राण** इति समाख्याता। अत्र हेतु**रुद्घात** इति। ऊर्ध्वं घात उद्घातो ग्रन्थि[4]भेदः, तत्कारणत्वात् शिखैवोद्घातशब्देनोच्यते। **प्राणान्त**[5][:] क्षकारः। अनेन तत्[6]स्थानभूतं संवर्तमण्डलं विसर्गाख्यमभिप्रैति। तेनायमर्थः— सा शिखा यदा योन्याधारात् प्राणान्तं विसर्ग**स्थानं** विशति, तदा ग्रन्थिच्छेदविधायिनी[ति] कृत्वा यत उद्घात इति कथ्यते, अतोऽस्मि**न्स्तन्त्रे** प्राणा(ण) इति समाख्याता। प्राणोऽप्यूर्ध्वविसर्गात्मतया उद्घातरूपं ग्रन्थिच्छेदं विधातुं प्रभवति[7]। तदुक्तं **श्रीविज्ञानभट्टारकेण**[8] — "ऊर्ध्वं प्राणे(णो) ह्यधो जीवो विसर्गात्मा पर[9]**रोच्यते**[10]" **(वि. भै., २४) इति**। उभयविसर्गबन्धन[11]स्वभावं योनिमुद्राबन्धाभिधेयं **महायोगं कालतन्त्रे**[1]ऽपि **कथयति** —

प्राणेन[12] प्रेर्यमाणेन अपानः पीड्यते यदा ।
गत्वा चोर्ध्व[13](र्ध्वं) निवर्तेत(तै)[त]दुद्घातलक्षणम् ॥इति।

उक्तं[14] च **श्रीमद्भगवद्गीतासु** —

अपाने जुह्वति प्राणं प्राणेऽपानं तथापरे ।
प्राणापानगती रुद्ध्वा प्राणायामपरायणाः ॥
अपरे नियताहाराः प्राणान् प्राणेषु जुह्वति ।इति।

(भ. गी. ४.२९-३०)

उक्तं **चोपनिषत्सु**—"वाचि [हि] प्राणं जुहुमः प्राणे [वा] वाचम्" (ऐ. उ. २.६.३) इति। एवं गत्यागती[15] वितन्वाना शिखैवेति कथयति **रत्नाख्ये श्रीमते**[16] —

---

१. इति नेति–म.। २. 'सा' नास्ति–म.। ३. प्राणा–म.। ४. भेदतत्त्वारित्वात्–म.। ५. अन्तः–त्रि.। ६. तत्तत्स्थानभूत–म.। ७. न प्रभ–म.। ८. 'श्री ....केण' नास्ति–त्रि.। ९. ऊर्ध्वप्राणाभिधो–त्रि.। १०. परोच्चरेत्–वि. भै.। ११. बन्धनभावं–त्रि.। १२. प्राणे तु प्रेत्यमाणत्वादपानः –म., प्राणेनोच्चार्यमाणेन-मु.। १३. चोर्ध्वस्थमित्येतदु–त्रि.। १४. 'उक्तं ....वाचम् इति' नास्ति–त्रि.। १५. गत्वा गतिवितन्या नाना शिखैवेति कथितम्–म.। १६. 'श्रीमते' नास्ति–त्रि.।

1 सार्धत्रिशतिकालोत्तरवृत्तौ (पृ. ३०-३१) रामकण्ठेन त्रयोदशशतिक(कालोत्तर) वचनत्वेन स्मृतोऽयं श्लोकः।

तन्मध्ये कुण्डली देवी शिवेन सहिता प्रिये ।
स्थानानि भेद्य गच्छन्ती[1] पिबन्ती[2] लम्बिकामृतम् ॥इति ।

एवं गत्वा[3]गतिविमर्शिनो योगिनो द[ा]हनप्लावनाभ्यास इति मन्तव्य[4]म् ॥१८॥

एवमभ्यसमानस्य अहन्यहनि निश्चयात् ।
जरामरणदुःखाद्यैर्मुच्यन्ते भवबन्धनात् ॥१९॥

इति । [5]अनेन योनिमुद्राबन्धनस्य फलातिशयं दर्शयति ॥१९॥

चतुर्विधा तु या सृष्टिर्यस्यां योनौ प्रवर्तते[6] ।
पुनः प्रलीयते तस्यां कालाग्न्यादिशिवान्तकम् ॥२०॥
योनिमुद्रा परा या तु बन्धस्तस्याः प्रकीर्तितः[7] ।

इति । [8]चतुर्विधा तु या जगत्सृष्टिर्यस्यां योनिभूताया(यां) प्रवर्तते, **कालाग्न्यादिशिवान्तं** च तत्त्वजातं यस्यां लिख्यते, सा **योनिमुद्रा परा** निरतिशयोत्कर्षयुक्ता, **तस्या बन्धस्तत्त्वेन** कथितम्(तः) ॥२०-२०$\frac{१}{२}$॥

मुद्राया बन्धमात्रेण किं न साधयते भुवि ॥२१॥

[9]इति । बन्धन्यै(स्यै)व प्रशंसनीय[त्व]म् ॥२१॥

अन्यथा जपते[10] मन्त्रमन्यथा कुरुते तु यः ।
नासौ सिद्ध्यति देवोऽपि[11] सत्यं सत्यं पुनः पुनः ॥२२॥

इति । यो मन्त्रजातं बन्धं विना जपति, [12]आकर्षणादिक्रियाकलापं बन्धं विना करोति, स न सिद्ध्यति, न फलेन युज्यत [13]इत्यर्थः ॥२२॥

---

१. न्ति–म.। २. न्ति लम्बि–म.। ३. गत्वा गतिविमर्शो–म.। ४. व्यः–म.। ५. 'अनेन .... दर्शयति' नास्ति–त्रि.। ६. योनिः –त्रि.। ७. तम्–त्रि.। ८. 'चतुर्वि ... . कथितम्' नास्ति–त्रि.। ९. 'इति' नास्ति–त्रि.। १०. कुरुते–म.। ११. देवेशि–म.। १२. 'आकर्ष .... करोति' नास्ति–त्रि.। १३. 'इत्यर्थः' नास्ति–त्रि.।

छिन्ना रुद्धास्तु ये मन्त्राः स्तम्भिताः कीलिता भृशम् ।
दग्धाः स्रस्ताः[१] सिता भीता मलिनाश्च तिरस्कृताः ॥२३॥

मुद्रिता[२] मदसंयुक्ताः सुषुप्ता मूर्च्छिता द्रुताः ।
मन्दा बालास्तथा वृद्धाः प्रौढा यौवनगर्विताः ॥२४॥

अरिपक्षे[३] स्थिता ये च निर्बीजाः[४] सत्त्ववर्जिताः ।
अंशकेन[५][1] विहीनाश्च खण्डशः शतधा कृताः ॥२५॥

इति । अत्र चिह्नित(छिन्ना)दयो मन्त्रदोषा मन्त्रफला मन्त्रभेदे लक्षणभेदेन द्रष्टव्याः ॥२३-२५॥

विधिनानेन युक्ताश्चेत्[७] ते भवन्त्यचिरेण तु ।
सिद्धिमोक्षप्रदाः सर्वे देशिकेन नियोजिताः ॥२६॥

इति । एवंविधदोषजाताघ्राता अपि मन्त्रा[६] देशिकोत्तमेन यथोक्तमुद्राबन्ध-विधिना प्रयोजिताश्चेत्[७] सिद्धये सम्पद्यन्त इत्यर्थः । अनेन योनिमुद्रा[८]-बन्धविधि[९]ज्ञानमेव देशिकत्वमिति दर्शितं भवति ॥२६॥

[2]यद्यदुच्चरते मन्त्री वर्ण[१०]रूपं शुभाशुभम् ।
तत्तत्सिद्ध्यत्[११]यनायासाद् योनिमुद्रा[१२]प्रबन्धनात् ॥२७॥

अनेन[१३]नापि बन्धन्यै(स्यै)व प्रभावः प्रदर्श्यते ॥२७॥

---

१. स्वतन्त्रभीताश्च–म.। २. 'मुद्रिता .... गर्विताः' नास्ति–त्रि.। ३. पक्ष–त्रि.। ४. स्तत्त्व–म.। ५. 'अंशकेन .... द्रष्टव्याः' नास्ति–त्रि.। ६. 'मन्त्राः' नास्ति–म.। ७. श्चेति–म.। ८. योनिषु–त्रि.। ९. 'विधि' नास्ति–त्रि.। १०. मन्त्रवर्ण–अ.। ११. ति देवेशि–अ.। १२. निब–अ.। १३. 'अनेना .... र्श्यते' नास्ति–त्रि.।

1 षड्भेदभिन्नस्य अंशकस्य निरूपणं स्वच्छन्दतन्त्रेऽष्टमे पटले (श्लो.१-१८) द्रष्टव्यम् ।

2. नि. षो. व्याख्यायामर्थरत्नावल्यां (पृ.७०) स्मर्यतेऽयं श्लोकः ।

दीक्षयित्वा विधानेन अभिषिच्य सहस्रधा ।
ततोऽधिकारि(री) देवोऽपि[१] तन्त्रेऽस्मिन् नान्यथा[२] भवेत् ॥२८॥

[३]इति । [४]अनेन प्रकारेण योनिमुद्राबन्धप्रशंसाप्रसङ्गादस्मिन् तन्त्रे पुरुषस्याधिकारित्वं महताऽऽयासेन(से)न लभ्यमिति कथयति । अयमर्थः — तेन तन्त्रान्तरोक्तविधानेन सहस्रधा दीक्षयित्वा सहस्रधाऽभिषिच्य स्थितस्य पुनस्तन्त्रेऽस्मिन्नधिकार इत्यर्थः ॥२८॥

मुद्रामण्डलविन्यासैर्[५]जपहोमव्रतादिभिः ।
संताप्य बहुकालं तु भक्ति[६] विज्ञाय निश्चलाम् ॥२९॥
[७]संताप्य बहुकालं तु प्राणस्त्रीद्रविणादिभिः ।
ज्ञात्वा त्यागं बलं तापं ततस्तस्य प्रकाशयेत् ॥३०॥

[८]इति । [९]अनेनाधिकारिणश्च न सद्य एव तन्त्रं प्रकाशयेदिति कथयति । [१०]मुद्रादिभिः सन्ताप्य प्रथममल्पकृतार्थतां संपाद्येत्यर्थः ॥२९-३०॥

यस्मिन् कालेऽथवा देवि [११]दिव्यावेशः प्रजायते ।
[१२]तस्येदं कथयेज्ज्ञानमन्यथा नरकं व्रजेत् ॥३१॥

[१३]इति । **देव्यादेशो**ऽधिकारिणं प्रत्या[१४]चार्यस्य[ा]धिकारित्व[१५]प्रत्यायकः स्वप्नादि[१६]कः प्रमाणविशेषः; [१७]तस्मिन् सति सर्व[म्] एव प्रकाशयेदित्यर्थः ॥३१॥

---

१. देवेशि–म.। २. पुनः –त्रि.। ३. 'इति' नास्ति–त्रि.। ४. 'अनेन इत्यर्थः' इत्यस्य स्थाने 'अस्मिंस्तन्त्रे पुरुषस्याधिकारित्वमुपादाय सौलभ्यमिति कथयति। अयमर्थः — तन्त्रान्तरोक्तविधिना सहस्रधा दीक्षयित्वा सहस्रधाऽभिषिच्य अस्य पुनस्तन्त्रेऽस्मिन्नधिकारित्वमित्यर्थः' इति–त्रि.। ५. न्यासैः परहो–त्रि.। ६. भक्तिविज्ञाननिश्चिताः –म.। ७. संतप्य–म.। ८. 'इति' नास्ति–त्रि.। ९. 'अनेना .... कथयति' इत्यस्य स्थाने 'अनेन सद्योऽस्मिंस्तन्त्रेऽधिकारीति दर्शयति' इति–त्रि.। १०. 'मुद्राभि[:] सन्तर्प्य प्रथममल्परूपां कृतार्थतामापाद्यन्त इत्यर्थः –म.। ११. देव्या–त्रि., वस्तुतस्त्वत्र व्याख्यासमर्थितेन 'देव्यादेशः' इति पाठेनैव भाव्यम्। १२. तस्यैतत्–त्रि.। १३. 'इति' नास्ति–त्रि.। १४. चार्याधि–त्रि.। १५. प्रत्ययः –म.। १६. दितः –म.। १७. 'तस्मिन् .... दित्यर्थः' नास्ति–त्रि.।

त्राता किन्तु न तस्यास्ति योऽपरीक्ष्य प्रदापयेत् ।
तस्मात् परीक्ष्य दातव्यं यदि(दी)च्छेज्जीवितं चिरम् ॥३२॥

इति । अपरीक्ष्य प्रदानस्य प्रत्यवायं महान्तं दर्शयति ॥३२॥

कृत्वा पापसहस्राणि असंख्यातानि सुन्दरि ।
दहत्युच्चारमात्रेण योनिबन्धेन नान्यथा ॥३३॥
न तस्य पुण्यपापानि तमः सूर्योदये यथा ।
सन्तर्प्य बहुधा कालं प्राणस्त्रीद्रविणादिभिः ॥३४॥

इति । 'परीक्ष्य तु' इत्यध्याहार्यम् ॥३३-३४॥

तस्मादभ्यसनं नित्यं कर्तव्यं पुण्यकाङ्क्षिभिः ।
अभ्यासाज्जायते सिद्धिरभ्यासान्मोक्षमाप्नुयात् ॥३५॥
संवित्तिं लभतेऽभ्यासाद् योगोऽभ्यासात् प्रवर्तते ।
मन्त्राणां सिद्धिरभ्यासादभ्यासाद् वायुसाधनम् ॥
कालवञ्चनमभ्यासात् तथा मृत्युञ्जयो भवेत् ॥३६॥

॥ इति प्रथमः पटलः ॥

इति । मुद्राबन्धनावस्थाकर्तव्यतां(ता)फलानि कथयति ॥३५-३६॥

॥ इत्युत्तरषट्कविवरणे प्रथमः पटलः ॥

■

---

१. वितुं–त्रि.। २. 'अप .... नान्यथा' नास्ति–त्रि.। ३. पङ्क्तिरेषा नास्ति–त्रि.। ४. दातुरित्य–म.। ५. दव्यसनं–त्रि.। ६. सादथ–त्रि.। ७. 'इति ... पटलः' नास्ति–म.। ८. 'मुद्रा .... पटलः' नास्ति–त्रि.।

द्वितीयः पटलः

अथ त्रिपुराविद्याया उद्धारयन्त्रं विवरि(री)तुमुपक्रमते[1]—

[1]अथातः संप्रवक्ष्यामि सम्प्रदायसमन्वितम् ।
त्रैलोक्यडामरं म(य)न्त्रं [2]त्रिपुरावाचकं महत् ॥१॥

[3]अथशब्दो मङ्गले ॥१॥

[2]सुसमे भूप्रदेशे तु निम्नोन्नतविवर्जिते ।
पुष्पप्रकरसंकीर्णे[4] गन्धधूपाधिवासिते ॥२॥
ललाटतिलकोपेतो नेत्रे[5]कज्जलरञ्जि[6]तः ।
[7]ताम्बूलपूर्णगण्ड[8]स्तु मदिरानन्दचेतन[9]ः ॥३॥
कुङ्कुमेन विलिप्ताङ्गो लाक्षालक्तकशोभितः ।
रक्तवस्त्रपरीधानो रक्तमाल्योपशोभितः ॥४॥
कर्पूरक्षोददिग्धाङ्गः क्रोधपैशुन्यवर्जितः ।
[10]उद्धरेत् त्रिपुरां देवीं दृष्टादृष्टफलप्रदाम् ॥५॥
अष्टपत्रं लिखेत् पद्मं केसराढ्यं सकर्णिकम् ।
पत्राग्रे ग्रन्थिसंयुक्तं तदग्रे [11]त्रित्रिशृङ्गकम् ॥६॥

---

१. क्रमति–म.। २. त्रिपुरायोगमुत्तमम्–त्रि. ल. (पृ. २)। ३. 'अथ .... ङ्गले' नास्ति–त्रि.। ४. शोभाढ्ये–गो.। ५. नेत्रं–त्रि.। ६. रञ्जितम्–त्रि.। ७. तमाल–त्रि.। ८. गण्डूषो–गो., गन्धश्च–म.। ९. नन्दितः–गो.। १०. उद्धरेतु महादेवीं–म.। ११. तु त्रि–त्रि.

1. त्रिपुराभारतीलघुस्तवस्य व्याख्ययोः (पृ. २, २४) स्मर्यते वचनमिदम् ।

२. अत्रत्यं 'सुसमे .... पुष्प .... ताम्बूल' इति पङ्क्तित्रयं गोरक्षसंहितायां (१०.१३५-१३६) दृश्यते ।

[1]इति। अथ यथोक्ते[2] भूप्रदेशे [3]देशिकोऽष्टपत्रं केसराढ्यं सकर्णिकं पत्राणामग्रभागेषु ग्रन्थिभि[4]र्वृत्तमण्डलाकृतिभिर्युक्तं ग्रन्थीनामग्रभागेषु त्रिभिस्त्रिभिः शृङ्गैः शूलविन्यासैरभिसंयुक्तं पद्मं लिखेत् ॥२-६ ॥

[5]शृङ्गाष्टावलीतो [6]भद्रे [7]यथा वक्ष्यामि तत्क्रमम् ।

[8]इति। भद्रे इति परमेश्वरीं संबोधयति। इह त्रिभिस्त्रिभिः शृङ्गैः प्रतिदलमे[9]कमेकमित्यष्टौ [10]शृङ्गानि(णि)। [11]तान्यभित[12]स्तत्क्रमं [13]त्रिपुराविद्यासम्बन्धिनं मातृकाचक्रं [14]वक्ष्यामीत्यर्थः। [15]अष्टौ शृङ्गादि(णी)ति ग्रन्थिनां दलानां चोपलक्षणम्। दलेषु ग्रन्थिशृङ्गेषु उक्तमार्गेण विन्यसेत् ॥६ $\frac{1}{2}$ ॥

इदं चक्रं प्रयत्नेन लिखित्वा साधकोत्तमः ।
मातृकां विन्यसेत् पश्चात्

इति। इदमेवंविधं [16]चक्रं पद्मरूपं [17]लिखित्वा पश्चात् तस्य दलेषु ग्रन्थिशृङ्गेषु, एतत्तन्त्रोक्तप्रकारेण देशिको मातृकां [18]विन्यसेत् ॥

कथमित्याह—

पीठभैरवयोगिनीम् ॥७॥

इति। **पीठाः** कामरूपाद्याः। **भैरवा** असिताङ्गा[19]द्याः। **योगिन्यो** ब्रा[20]ह्म्याद्याः। एतास्तत्र पूर्वं न्यसेत् ॥७॥

---

१. 'इति' नास्ति–म.। २. यथोक्त–त्रि.। ३. 'देशिको'–नास्ति त्रि.। ४. वृत्तं–त्रि.। ५. शृङ्गोद्भतवातो–म.। ६. मुद्रे–त्रि.। ७. यदा–म.। ८. 'इति .... धयति' नास्ति–त्रि.। ९. मेकैकशृङ्गमि–म.। १०. शृङ्गाः–त्रि.। ११. तानभितः –त्रि.। १२. नन्वयं–त्रि.। १३. मन्त्रपुरासम्बन्धि मा–त्रि.। १४. वक्ष्यमाण(मि)त्यर्थः –त्रि.। १५. 'अष्टौ .... पश्चात्' इत्यस्य स्थाने–'अष्टौ ग्रन्थयः, अष्टौ दलानि, दलाग्रे ग्रन्थिशृङ्गेषु उक्तमार्गेषु विन्यस्तं चक्रं प्रयत्नेन लिखित्वा साधकोत्तमां(मो) मातृकां विन्यसेत् पश्चादिति'–त्रि.। १६. 'चक्र' इत्यस्य स्थाने 'च' इत्येव–म.। १७. इत परं 'चक्रं' इति–म.। १८. न्यसेत्–त्रि.। १९. ङ्गादयः –त्रि.। २०. ब्रह्माण्याद्याः –त्रि.।

एतदेव कथयति —

[1]कामरूपं लिखेत्[2] पूर्वे कोल्लगिर्यं तु दक्षिणे ।
[3]चोहारं पश्चिमे लिख्य उत्तरे [4]ओणकं लिखेत् ॥८॥
मलयं चाग्निदिग्भागे नैर्ऋत्यां तु कुलान्तकम् ।
जालन्धरं तु वायव्ये ऐशाने[5] देविकोट्यकम् ॥९॥

इति । [6]पूर्वे, दल इत्यध्याहारः । [7]अत्र पूर्वादिदिग्दलेषु कामरूपादिपीठ-विन्यासानुपपत्तेस्तान्येव कामरूपादिपीठात्मना भावयेदित्यवगन्तव्यम् ॥८-९॥

पीठेशान् विन्यसेत् तत्र असिताङ्गादिभैरवान् ।
ब्रह्माणीमादितः कृत्वा चण्डिकान्तं प्रकल्पयेत् ॥१०॥

इति । पीठेशान् विन्यसेत् तत्रेति । [8]तेषु दलेष्वित्यर्थः ॥१०॥

असिताङ्गो रुरुश्चण्डः क्रोध[9] उन्मत्तभैरवः ।
कपाली भीषणश्चैव संहारश्चाष्टमः स्मृतः ॥११॥
ब्राह्मी माहेश्वरी चैव कौमारी वैष्णवी तथा ।
वाराही चैव माहेन्द्री चामुण्डा चण्डिका तथा ॥१२॥

[10]इत्यन्तमत्र सुगमम् ॥११-१२॥

दीर्घस्वरांश्च एकै[11]कान्[12] मातृकाणां प्रकल्पयेत् ।
ह्रस्वास्तु भैरवाः ख्याता यामलान् वै प्रकल्पयेत् ॥१३॥

---

१. भवेत्–अ.। २. चोभारं–त्रि., चोम्भारं–अ.। ३. क्षौक्षणं–म., चोणकं–अ.। ४. ऐशान्ये–अ.। ५. कोट्टकम्–अ.। ६. पूर्वदले–त्रि.। ७. 'अत्र .... गन्तव्यम्' इत्यस्य स्थाने 'तानि दलान्येव कामरूपादि विना भावयेदित्यवगन्तव्यः' –त्रि.। ८. त्रिषु–त्रि.। ९. धश्चो–त्रि.। १०. 'इत्य .... मम्' नास्ति–त्रि.। ११. कैकं–म.। १२. मातॄणां च–म.।

1. श्लोकद्वयमिदमर्थरत्नावल्यामुद्धृतं वर्तते (नि. षो., पृ. १०)।

इति। अयमर्थः — [1]दीर्घस्वराणामाकारादिविसर्गान्तानामष्टानां लेखनं [१]ब्रह्माण्यादियोगिनीन्यासः। अकाराद्यनुस्वारान्तस्य ह्रस्वाष्टकस्य लेखनमसिताङ्गादिभैरवन्यासः। [३]तेन दीर्घस्वरा एव ब्राह्म्याद्याः। ह्रस्वा भैरवा असिताङ्गादयः संहारान्ताः। तांश्चैकैकस्मिन् दले [३]यामलानि प्रकल्पयेत्। तेन कामरूपाख्ये दले [४]असिताङ्गाख्यमकारम्, ब्रह्माण्याख्यमाकारं च सहितं लिखेत्। एवमन्येष्वपि दलेषु ॥१३॥

भैरवयोगिनीन्यासं दर्शयित्वा ग्रन्थिषु मातृकान्यासमाह—

कादिवर्गाक्षरा[५] भद्रे ग्रन्थिषु क्षान्तगा[६]: शुभाः ।

इति। [७]कादयः पञ्चवर्गाः, अन्तस्था ऊष्माणश्चेति सप्तवर्गाः, क्षकारश्चैको वर्ग इत्यष्टौ वर्गाः। एषां [८]कादीनि क्षान्तगान्यक्षराणि क च ट त प य श क्षाः। ते **ग्रन्थिषु** पूर्वादिषु न्यस्याः ॥१३$\frac{१}{२}$॥

अन्यवर्णगणाः सर्वे शृङ्गकोणेषु संस्थिताः ॥१४॥

इति। **अन्यवर्णगणाः** सकारहकारवर्जिताश्चतुर्विंशतिः पूर्वादिषु शृङ्गप्रान्तेषु चतुर्विंशतिर्लेखनीयाः ॥१४॥

कादिक्षान्तान् न्यसेद् ग्रन्थौ शेषान् शृङ्गेषु विन्यसेत्।

इति। [९]अनेनोक्तमेव व्यक्तीकरोति ॥१४$\frac{१}{२}$॥

दक्षिणादीन् न्यसेद्वर्णान् सर्वसिद्धिफलप्रदान् ॥१५॥

इति। [१०]दक्षिणादिविन्यासे वर्णाः सिद्धये भवन्तीत्यभिप्रायः ॥१५॥

---

१. 'ब्रह्मा .... लेखनम्' नास्ति–म.। २. 'तेन .... रान्ताः' नास्ति–त्रि.। ३. 'यामलानि .... दले' नास्ति–त्रि.। ४. 'असिता ... माकारं' इत्यस्य स्थाने 'ब्रह्माण्याख्यमाकारमसिताङ्गाख्यमकारं' इति–त्रि.। ५. रान्–त्रि.। ६. न्तराः –म.। ७. 'कादयः पञ्चवर्गाः' इत्यस्य स्थाने 'कादयस्ते वर्गाक्षराः। तवर्गादयः पञ्च' इति–म.। ८. तादीनि–म.। ९. इत्युक्तमेव–त्रि.। १०. दक्षिणादि .... प्रायः' नास्ति–त्रि.।

1. दीर्घस्वराणामष्टानां विन्यासप्रकारः त्रि. ल. (पृ. ३३) इत्यत्र द्रष्टव्यः। अस्मिन्नेव पृष्ठे पङ्क्तिद्वयमन्यदपि दृश्यते उत्तरषट्कस्य।

तं च दक्षिणादिन्यासमाह —

ऐन्द्राद्युत्तरशृङ्गान्तं दक्षिणेन प्रकल्पयेत् ।

इति । इन्द्रदिग्भागादारभ्योत्तरशृङ्गादिविधिन्यासो दक्षिण-विन्यासः ॥१५$\frac{१}{२}$॥

तदादि विन्यसेद्धीमान् रविमार्गेण साधकः ॥१६॥

इत्यनेनैतदेव स्थिरयति । ऐन्द्रमादिं कृत्वा रवेर्दक्षिणायनप्रकारेण वर्णान् विन्यसेत् ॥१६॥

जीवाख्यो कर्णिकामध्ये हंसाख्य[:] पदविश्रुतौ ।

इति । कर्णिकायां च चिन्मन्त्रसंज्ञितं वर्णद्वयं लिखेदित्यर्थः ॥१६$\frac{१}{२}$॥

किं तदित्याह —

सकारो जीवभूतस्तु हकारः प्राण उच्यते ॥१७॥
उभौ जीवेति विख्यातौ त्रैलोक्ये सचराचरे ।

इति । जीव इति सकारस्यैकस्यापि संज्ञा, हकारसकारयोरिति तात्पर्यः (र्यम्) ॥१७-१७$\frac{१}{२}$॥

एवं न्यस्य विधानेन पूजयेत् कुलपद्धतिम् ॥१८॥

इति । कुलपद्धतिमिति चक्रस्यैव संज्ञा ॥१८॥

एतदन्तरतो ध्यायेद् वाग्भवं देवि साधकः ।

इति । अस्य चक्रस्य मध्ये वाग्भवं ध्यायेत् पूजयेत् । तेन वाग्भवचक्र-मेतदिति दर्शितं भवति ॥१८$\frac{१}{२}$॥

---

१. 'दारभ्यो .... विन्यासः' इत्यस्य स्थाने 'दारभ्य प्रादक्षिण्येनोत्तरशृङ्गावधीत्यर्थः'–त्रि.। २. स्थित इति–म.। ३. चिन्मात्रसंज्ञेयं–म.। ४. 'लिखेत्' नास्ति–म.। ५. 'जीव .. .. तात्पर्यः' नास्ति–त्रि.। ६. रिति–त्रि.। ७. ध्यात्वा–म.।

इतीह[1] वाग्भवचक्रं प्रकाश्य ततो विद्यामुद्धरति—

ततः समुद्धरेन्मन्त्रं भुक्तिमुक्तिफलप्रदम् ॥१९॥

इति। सुगमम्[2] ॥१९॥

इन्द्राणीबीजमादाय संहारेण तु मण्डितम्।

इति। तत्र तावन्महाविद्यायास्त्रिपुरसुन्दर्याः सामान्यविशेषात्मकं रूपद्वयं भवति[3]। तत्र सामान्यं नाम श्रीकण्ठानन्तरुद्रलकुलीश्वराख्यैर्[4]विशेषैर्विधुरं केवलं पादत्रयात्मकम्। इतरत्तु तैस्त्रिभिः[5] संयुक्तम्। एतदुभयं चानेन दर्शयति। तत्र तावदिन्द्राणीबीजं नाम द्वादशस्वरः, संहारोऽनुस्वारः, तेन मण्डितं[6] सहितमिति यावत्। अतोऽनुस्वारसहितो द्वादशस्वरो वाग्भवाख्यो मनुर्भवति सामान्यं रूपम् ॥१९$\frac{१}{२}$॥

अथ विशेषरूपमाह—

तद्भवेनैव चाक्रान्तं वाग्भवं देवपूजितम् ॥२०॥

इति। अस्यार्थमेव[8] वर्णयति — **तदिति** इन्द्राणीबीजं परामृश्यते, **भवः** श्रीकण्ठः, **तेनाक्रान्तं** सहितमित्यर्थः। तेनेन्द्राणीबीजमेव श्रीकण्ठा[न]न्तरभावि-विशेषरूपं **वाग्भवं** भवतीति। एवमिदं व्याक्रियमाणमेकादशस्वरस्य[9] वाग्भवता सूचयिष्यता "श्रीकण्ठो बालिशः" (४.१३) इत्यादिनोत्तरेणाक्षरार्थसूत्रेण व्याह-न्यते। तस्मादन्योऽर्थः — तद् भवेनैव चाक्रान्तमिति तदिन्द्राणीबीजं भवेनाक्रान्तमधिष्ठितं श्रूयमाणेन श्रीकण्ठेन संयुक्तमित्यभिप्रायः[11]।इन्द्राणीबीजे हि संहितारूपेण[12][13][14] अन्तःकृतः श्रूयमाणो[15] भवतीति श्रीकण्ठस्तत्रिवर्तयत्याक्रान्तपदेन[16]। इन्द्राणीबीजं नाम श्रीकण्ठयोनिवर्णसंहितारूपं[17][18] तत्संहाररूपकवलीकारं हित्वा

१. 'इति .... रति' नास्ति–त्रि.। २. 'सुगमम्' नास्ति–त्रि.। ३. संभवति–म.। ४. धैर्विशेषैर्मधुरं केवलपाद–म.। ५. स्त्रिभिरभि–त्रि.। ६. सपातमिति–म.। ७. देवि–म.। ८. मेके वर्णयन्ति। तदितीन्द्राणीबीजं–म.। ९. स्वरन्यासे–म.। १०. तद्भवेना–म.। ११. मित्यर्थः–म.। १२. संपाता–म.। १३. कूपे–त्रि.। १४. णाक्रान्तमेको–त्रि.। १५. श्रूयमाणा–म.। १६. र्तयित्वा–म.। १७. संपाता–म.। १८. 'रूपं .... रूप' नास्ति–त्रि.।

श्रूयमाणेनैव श्रीकण्ठेन संयुज्यमानं विधाय श्रीकण्ठयोनिबीजात्मकानुस्वारात्मना वर्णत्रयं विशेषरूपं वाग्भवमिति कथितं भवति । तदा(था) चैवंविधस्य मनोर्वाग्भवत्वं **श्रीमते** [1]श्रीव्या(व्यो)मचक्रविवरणे प्रकाश्यते —

एकाराकारविभवा त्रिकोणा बिन्दुरूपिणे(णी) ।

सिद्धयोगेश्वरे(री)**मते**ऽप्येकादशस्वरस्यैव वाग्भवतामुद्घोषयति —

प्रथमशृङ्गाटकाकारमेकारेति प्रकीर्तितम् ।
वाग्भवं तस्य तद्बीजं बिन्दुनादेन कीर्तितम् ॥इति ।

उक्तं च **लघुपादैः** —

"या मात्रा त्रपुसीलततानुलसत्तन्तूत्थितिस्पर्द्धिनी
वाग्बीजे प्रथमे स्थिता तव सदा [तां] मन्महे ते वयम् ।
शक्तिः कुण्डलिनीति" (ल. स्त. २)

अत्र मात्रेति पदविच्छित्त(त्तिः) कर्तव्या ॥२०॥

तदेव(वं) वाग्भवमुभयस्वरूपे[ण] प्रदर्श[र्श्याऽ]नधिकारिणे न देयमिति कथयति—

न देयं परशिष्येभ्यो भक्तिहीने विशेषतः ।
एतद्बीजं महाबीजं सृष्टिभूतं परं प्रिये ॥२१॥

इति ॥२१॥

अथ कामराजं प्रस्तौति—

---

१. 'तदा ... कथयति' सर्वत्र त्रुटिपूर्णः पाठः – त्रि.। २. 'एतद्बीजं .... इति' नास्ति – त्रि.।

1. 'तथा च श्रीकुब्जिकामते खण्डचक्रविचारेऽमुमेवार्थं प्रधानतयाधिकृत्यादिष्टम्—मायोपरि महामाया त्रिकोणानन्दरूपिणी' (पृ. १८४) इत्येवं परात्रीशिकाव्याख्यायामभिनवगुणोऽमुमेव विषयं व्याकरोतीति प्रतीयते ।

कामग्रन्थिं समादाय शृङ्गं कूटस्य दक्षिणम् ।
माहेश्वरीयुतं कृत्वा संहारेण समं कुरु ॥२२॥

इति । **कामग्रन्थिर्नाम** ककारः । **कूटं** नाम वाक्चक्रस्य देविकोट्याख्यो ऐशानो दलविशेषः । तस्य दक्षिणशृङ्गस्थिरत्वाद् लकारः **कूटस्य दक्षिणं** शृङ्गमिति कथ्यते । **माहेश्वरी** नाम ईकारः । **संहारोऽनुस्वारः** ॥२२॥

अनयाऽऽनुपूर्व्या कामराजमुद्धृत्य फलातिशयत्वं सूचयति —

क्षोभकृत् सर्वतत्त्वानां जीवभूतं परात्परम् ।

इति । सर्वतत्त्वानां सर्वात्मनां **क्षोभं** महानुरागं जनयेदित्यर्थः ॥२२$\frac{1}{2}$॥

त्रैलोक्यपूजितं देवि सृष्टिसंहारकारकम् ॥२३॥
कामराजमिदं देवि कामसिद्धिप्रदायकम् ।

इति । सुगमम् ॥२३-२३$\frac{1}{2}$॥

अनन्तरमस्य कामराजस्य विशेषमाह—

परापरविधानं तु एकीकृत्य स साधकः ॥२४॥
जपेदेकाग्रचित्तस्तु पातालादिषु साधने ।

इति । **पर** उत्कृष्टः, **अपरः** अकारात् परो वर्ण आकारः, परश्चासावपरश्चेति परापरः । स एव हि विभागो विशेषः । तं यथोद्धृतेन कामराजेन सहितं कृत्वा **जपेदित्यर्थः** । उक्तं च **श्रीलघुपादैः** —

"यन्त्रित्ये तव कामराजमपरं मन्त्राक्षरं निष्कलम्" (ल. स्त. ४) इति । अत्ये(त्रे)कारपूर्वभावी अपरो वर्ण आकार इत्ययं वर्णक्रमः । तथा च **श्रीरुद्रयामले**

---

१. वागी–त्रि.। २. 'वाक्चक्र ... नुस्वारः' इत्यस्य स्थाने 'वाग्भवचक्रस्य दिव ... . हाख्यस्य एशनो दलविशेषः, तस्य यक्षिणस्यङ्गस्थितत्वात्। संहारोऽनुस्वारः' इति–म.। ३. भूतानां–त्रि.। ४. परापरम्–त्रि.। ५. 'सर्व .... दित्यर्थः' नास्ति–त्रि.। ६. देवी–म.। ७. 'सुगमम्' नास्ति–म.। ८. विभागं–त्रि.। ९. तु–म.। १०. अकारोत्तरो–त्रि.। ११. 'हि' नास्ति–म.। १२. पूर्वात्परो वर्णः–म.। १३. उक्तं–त्रि.।

सकीलविद्यारूपेण दर्शितः[१]—"क्लां ईं मदद्रवे अ[२] एं क्लिन्ने कुले ह्यौः[३]" इति। लघुपादैरपि चोक्तं निष्क(ष्की)लविद्यारूपेण — "आईपल्लवितैः" (ल. स्त. १९) इति। उक्तं[४] च **श्रीज्येष्ठनाथेन** — "आरामसंज्ञाममृतामनन्तां तियदाशं(.?); कुण्डलिनीं निमग्नाम्" इति। **एकाग्रचित्तस्तु** भावनाप्रकारः। **पातालादिषु साधन** इति बीजादिसाधन इत्यर्थः ॥२४-२४$\frac{१}{२}$॥

अथ शक्तिबीजमुद्धरति—

प्राणासनस्थितं जीवं चामुण्डाभेदितं पुनः[५] ॥२५॥
चण्डिकायां तु संरुद्धं[६] बीजं त्रैलोक्यमोहनम्।

इति। प्राणो हकारः, स एवासनं प्राणासनम्, तस्मिन् स्थितं **प्राणासनस्थितम्**। **जीव** इति सकारः। तया[७](तेन) **भेदितं**, विशेषितम्, सहितमिति यावत्। **चामुण्डा**[८] नाम औकारः। **चण्डिका** नाम विसर्जनीयः, तस्यां[९] **संरुद्धम्**, तया सहितमिति यावत्। एतदुक्तं भवति—वाग्भवचक्रे[१०] हि कर्णिकायां हकारमासनं कृत्वा तदुपरि सकारविन्यासः। तेन प्राणासनस्थितं[११] जीवमिति सकारमभिदधाति। तं चामुण्डया चण्डिकया च संयुतं कृत्वा शक्तिबीजस्वरूपेण चक्रादुद्धरेदिति सामान्यम्[१२]। एवं प्रकारेण मृद्ध्वा तं परं बीजं श्रीदेशिकेन्द्रकटाक्षव शाल्लब्ध्वा पृथग्वाजीवमाजीवमावर्तयेदित्यर्थः ॥२५-२५$\frac{१}{२}$॥

एवंरूपात्मकं शक्तिबीजं प्रदर्श्य विशेषमाह —

सदाशिवासनस्थं वै उच्चारेण तु लक्षयेत् ॥२६॥

---

१. 'दर्शितः' नास्ति–त्रि.। २. 'अ' नास्ति–त्रि.। ३. ग्लौः –त्रि.। ४. 'उक्तं ....त्यर्थः' नास्ति–त्रि.। ५. ततः –त्रि.। ६. संशुद्धं –म.। ७. 'तया .... यावत्' नास्ति–त्रि.। ८. 'चामु ....कारः' नास्ति–म.। ९. 'तस्यां ....तया' इत्यस्य स्थाने 'ताभ्यां' इत्येव–म.। १०. 'चक्रे हि' नास्ति–म.। ११. नस्थं–म.। १२. 'सामा .... माह' इत्यस्य स्थाने 'सामान्यं शक्तिबीजं प्रदर्श्य विशेषमाह' इति–त्रि.।

इति। सदाशिवो घोषः, स एवासनं सदाशिवासनम्, तस्मिन् स्थितं सदाशिवासनस्थम्, पूर्वं घोषमुच्चार्यानन्तरं पूर्वोक्तं शक्तिबीजमुच्चारयेदितिवाक्यार्थः। उक्तं च श्रीलघुपादैः— "सदाहःस्थिता" (ल. स्त. १) इति, "यत्सद्यो वचसां प्रवृत्तिकरणे दृष्टप्रभावं बुधैस्तार्तीयीकमहं नमामि मनसा तद्बीजमिन्दुप्रभम्" (ल. स्त. ५) इति [च]। [1]सद्यो वचसां प्रवृत्तिकरणे दृष्टप्रभावमिति प्राण बीज[2]भूतघोषाक्षरमाचष्टे। [3]तदा श्रीमते—"वैखरि(री) या (वाक्) प्रयोक्तृणा(णां) प्राणवृत्तिनिबन्धना" इति ॥२६॥

"कलातन्त्रं शुक्लम्", "हकारस्तु (मं ?) स्मृतः प्राणः" इत्युभयरूपां विद्यामुपदिश्य तत्साधनं पुरश्चरणविधिमाह—

पूर्वसेवां जपेल्लक्षं योनिबन्धेन निश्चलम् ।
बिलद्वारं समाश्रित्य एकचित्तो जितेन्द्रियः ॥२७॥

॥ इति द्वितीयः पटलः ॥

इति। **पूर्वसेवां** पुरश्चर्यामित्यर्थः। **बिलद्वारं** समाश्रितो योनिमुद्रां बध्वा पुरश्चर्यारूपेण [4]**लक्षं जपेद्** विद्यामिमां पुरश्चर्यारूपेण लक्षं जपेत्, त्रिंशद् दिनानि सततं जपं कुर्यादित्यर्थः। उक्तं च [5]**श्रीहंसभेदे**— "मासं लक्षमिति प्रोक्तम्" इति ॥२७॥

॥ [6]द्वितीयपटलव्याख्यानं समाप्तम् ॥

■

---

१. तत्र–त्रि.। २. भूतं–त्रि.। ३. 'तदा ..... माह' इत्यस्य स्थाने 'अनन्तरं पुरश्चरणविधिमाह' इति–त्रि.। ४. लक्षं जपेत् ..... लक्षं जपेत्' इत्यस्य स्थाने 'विद्यामिमां लक्षं जपेत्'–त्रि.। ५. 'श्रीहंसभेदे' नास्ति–त्रि.। ६. 'द्विती ..... प्तम्' नास्ति–त्रि.।

तृतीयः पटलः

अनन्तरं साध्यलोकस्याधिकारित्वप्रदायिनीं त्रिकविद्यासाधारणभूतां परमरहस्यभूतां[1] दीक्षां दर्शयितुं[2] तत्प्रधानाङ्गभूतं योनिमुद्राबन्धप्रकरणे— "कामं बन्धूकसन्निभम्" (१.१३) इति पुरा सूचितं कामतत्त्वयन्त्रं प्रश्नविषयत्वेनावतारयति—

अद्यापि संशयो देव कामतत्त्वस्य साधनम् ।
विज्ञानमात्रगमनं ब्रूहि[3] मे त्रिपुरान्तक ॥१॥

इति । **कामतत्त्वं** नामान्तःकृतहल्लेखादिकामराजादिकं वक्ष्यमाणं यन्त्रविशेषमाह । विज्ञानमात्रेण फलं गमयतीति **विज्ञानमात्रगमनम्** ॥१॥

श्रीभैरव उवाच
कथयामि समासेन कामतत्त्वस्य लक्षणम् ।
आकर्षणं परं दिव्यं शृणु शैवं[4] समासतः ॥२॥

इति[5] । सुगमम् ॥२॥

कामस्थं[1] काममध्यस्थं कामोदरपुटीकृतम् ।
कामेन[2] साधयेत्[6] कामं[7]

इति । **काममिति** हल्लेखाऽभिधीयते । **काममध्यशब्देन** निर्विशेषः कामराजः । **कामोदरपुटीकृतमिति** । कामोदरो नाम त्रिकोणविन्यासो द्वादशस्वरः, तेन

---

१. 'भूतां' नास्ति–त्रि.। २. रचयितुं–त्रि.। ३. देहि–म.। ४. श्रेष्ठ–त्रि.। ५. 'इति । सुगमम्' नास्ति–त्रि.। ६. कामयेत्–नि.। ७. 'कामम्' नास्ति–त्रि.।

1. कामस्थमित्यादिकं पङ्क्तित्रयं नि. षो. (४.४५-४६) आनुपूर्व्या दृश्यते ।

2. 'कामेन कामयेत् कामान् कामं कामेषु योजयेत्' इति च परात्रीशिकाव्याख्यायामपि (पृ. २२९) दृश्यते ।

संपुटितमिति यावत्। **कामस्थं काममध्यस्थमिति**[1] द्वितीयं कामोदरेण संपुटितं करणीयमित्यन्वयः। संपुटिताभिधानेन कामोदरद्वितयस्येतरेतराभिमुख्येनोत्तराधरभावेन[2] च विन्यासः। [तेन] षट्कोणं भवतीत्यवगन्तव्यम्। अत्रानुक्तो[3] विवरणग्रन्थे बिन्दुसंज्ञिता(तो) बूं(ब्लूं)कारोऽपि विन्यस्तोऽभिप्रेतोऽवगन्तव्यः। अत्र कामस्थादीनां हल्लेखादिवाचकत्वमुत्तरत्र "कामस्थं भुवनम्" (३.५) इत्यादिना ग्रन्थेन स्वयमेव विवरिष्यति। **कामेन**[4] **साधयेत् काममिति**। तत्रानेनाध्याहारः। अनेन कामेनेति यथोक्तरूपं हल्लेखादिचतुष्टयं कामतत्त्ववाच्यतया परामृशति। यत्र **रुद्रयामि(म)ले** हल्लेखाकामराजवाग्भवबिन्दुस्त्रि(स्त्री)काराख्यं कामपञ्चकमित्युद्घुष्यते। कामराजमन्मथादयः पञ्च क्रमाद् हल्लेखादीनामेव पञ्चानां संज्ञा वेदितव्या[:] । तथा च **तत्र** वक्ष्यति—

लक्षद्वयविलोमस्थैनं योगी न च तत्प्रिये ।
अवदेशेन बोद्धव्यमुद्धारश्चास्य सुव्रते ॥

इदं कामं समाख्यातं सर्वतत्त्वप्रबोधनम् ।
अयं व आः परा देवि तेजोवृत्तिमिवासिनः ॥

येषां संयोगरूपेण मन्मथं जायते प्रिये ।
कन्दर्पं कथयिष्यामि महाक्षोभकरं परम् ॥

---

१. मित्येतद्–म.। २. 'द्वितयस्य ....न्यासः' इत्यस्य स्थाने 'द्वितीयमन्येतरेतराभिमुख्ये विन्यासं सूचयति। तेन त्रिकोणरूपत्वाद् ओङ्कारयोरितराभिमुख्येनोत्तराधरभावेन विन्यासः' इति–म.। ३. 'तत्रानु ....तव्यः' इत्यस्य स्थाने 'तत्रानुक्तोऽपि विवरणग्रन्थोऽपि परमस्य मानत्वाद् बिन्दुसंज्ञितोकारविन्यासोऽभिप्रेतो मन्तव्यः' इति–म.। ४. 'कामेन ....विवरणमारभते' इत्यस्थ स्थाने 'कामं कामेषु निक्षिपेत्। कामयानं प्रकर्तव्यं मन्मथं विन्यसेत्तनुम्। कन्दर्पमन्दिरं कृत्वा द्विधाभूतं तु पार्वति॥ मकरध्वजबीजं तु षट्कोणेषु च दापयेत्। चत्वारस्ते महाकामाः पञ्चमस्योदरे क्षिपेत्॥ कामेन कामितं कृत्वा कामस्थं कामयेद् ध्रुवम्। एवम्भूतेन कामराजयन्त्रेण साध्ययोनिस्थं यथा भवति तथा ध्रुवं क्षोभयेत्। विसर्गस्थममृतमित्यर्थः' इति–त्रि.।

आः पूर्वं भूतमार्गस्थं मः पूर्वेण समन्वितम् ।
अभ्यासं योगजं देवि कन्दर्पं समुदाहृतम् ॥

क्षहा(ह)पूर्वं ऋतु(तू)न्माने ऋतुरेकादशी तथा ।
जानीयात् स्वरभेदेन मकरध्वजसंज्ञितम् ॥
ह्लादलद्वथ अः पूर्वे मनोर्भवति प्रिये ।इति ।

तेनायमर्थः—अनेन पाठक्रमविहितविन्यासेन कामस्थादीनि चतुष्टयरूपेण कामेन सह कामतत्त्वसंज्ञितं स्त्रिं(स्त्रीं)कारं लिखेदिति तात्पर्यार्थः । तथा कृते वा कामतत्त्वस्य सिद्धिर्भवतीति कृत्वा साधयेदिति । निवातकामतत्त्वाभिधायित्वमुत्तरत्र विवरिष्यते—"कामतत्त्वं प्रसाधयेत्" (३.६) इति । अत एवमभिदधानस्यायं यन्त्रविन्यासक्रमोऽभिप्रेतोऽवगन्तव्यः । कथमिति ? प्रथमं ह्लल्लेखामनुं विन्यस्य तामभितः कामराजम्, तां च सकामराजां ह्लल्लेखामभितः षट्कोणरूपं योनिसंज्ञितं वाग्भवम्, तस्य कोणेषु बिन्दुसंज्ञितान् ब्लूकारा[न]न्तः कृत्वा तथाविधषट्कोणकवलीकरणं स्त्रिं(स्त्रीं)कारं विलिखेदिति । उक्तं वा **श्रीरुद्रयामि(म)ले**—

मन्मथस्य[1] [च] मध्यस्थं कामराजं न्यसेत्तु तम् ।
कन्दर्पमन्दिरं कृत्वा द्विधाभूतं तु पार्वति ॥

मकर[ध्वजबीजं] तु षट्कोणेषु च दापयेत् ।
चत्वारस्ते महाकामाः पञ्चमस्योदरे क्षिपेत् ॥[इति] ॥२$\frac{१}{२}$॥

कामं कामेन[१] तु क्षिपेत् ॥३॥

---

१. कामेषु निक्षि–नि., 'कामे तु निक्षि' इत्यत्रैव षष्ठश्लोकव्याख्यायाम् ।

1. *अर्थरत्नावल्यां (पृ. २४२) त्रिपुरार्णववचनत्वेन श्लोकद्वयमेतदेवमुद्भियते— 'कामं प्राणं प्रकुर्वीत मन्मथं कारयेत् तनुम् । कन्दर्पं मन्दिरं कृत्वा द्विधाभूतं च पार्वति ॥ मकरध्वजं न्यसेद् देवि षट्स्थानेष्वस्य सुव्रते । मोहनाभ्यन्तरे कृत्वा वेष्टयेत् तस्य मायया ॥' इति ।*

इति । एवंभूतं कामराजं यन्त्रं कामराजसंज्ञिते साध्ययोनौ निक्षिपेत्, तद्गततया भावयेदित्यर्थः ॥३ ॥

कामेन कामितं कृत्वा कामस्थं क्षोभयेद् ध्रुवम् ।

इति । एवंभूतेन कामराजयन्त्रेण साध्यस्यात्मानं कामयन्त्रयन्त्रितं कृत्वा **कामस्थं** योनिस्थं यथा भवति तथा तया **ध्रुवं क्षोभयेद्** विसर्गस्थममृतमित्यर्थः । उक्तं च **श्रीमते** — "जन्मस्थानात् समुद्रेति[1] यावत्तद्ध्रुवमण्डलम्" (कु. म. ६.१११) इति । एतच्चोत्तरत्र "बिन्दुना" (३.७) इत्यादिना "तदा(था) तत् क्षोभयेद् ध्रुवम्" (३.७) इत्यन्तेन विवरणग्रन्थेन स्फुटीकरिष्यते ॥३ $\frac{१}{२}$ ॥

अस्मिंश्चक्रे कामराजं ध्यायेद् वै लोकपूजितम् ॥४ ॥

इति । सुगमम् ॥४ ॥

अथ "कामस्थम्" (३.३) इत्यादि(दी)नामनन्तरोक्तानां दुर्विज्ञेयतया परमकारुणिकः परमेश्वरः स्वयमेव विवरणमारभते—

कामस्थं भुवनं ज्ञेयं

इत्यादि । [2]भुवनमिति भुवनेश्वरीबीजमित्यर्थः ।

काममध्ये तु विग्रहम् ।

इति । [3]काममध्ये त्वित्यनेन पूर्वोक्त(३.३)काममध्यस्थमिति पदं वक्ष्य(द)ति । काममध्यस्थं नाम विग्रहं जानीयात्, कामस्य रूपं जानीयादित्यर्थः । कामस्वरूपं कामराजाख्यो मनुः ॥४ $\frac{१}{२}$ ॥

कामोदरं भवेद् योनिः

इति । [4]योनिर्नाम वाग्भवः ।

पुटान्तं(न्तः) बिन्दुसंज्ञितम् ॥५ ॥[5]

---

१. द्यन्ती यावत् तद्भव–कु.। २. 'भुवन .... त्यर्थः' नास्ति–त्रि.। ३. 'काम .... मनुः' नास्ति–त्रि.। ४. 'योनि .... भवः' नास्ति–त्रि.। ५. संज्ञकम्–त्रि.।

[1]भवेदित्यन्वयः। **पुटान्तरिति** ष ण्णा(ण्णां) कोणानामन्तरित्यर्थः। **बिन्दुसंज्ञितमिति** यन्त्रस्य वलनरूपेण, "वलनं बिन्दुरुच्यते" इति **निश्वासकारिकोक्त**वचनात् ॥५॥

ब्लूंकारमभिधत्ते—

अनेनैव तु कामेन कामतत्त्वं प्रसाधयेत्।

इति। "[2]कामेन साधयेत् कामम्" (३.३) इत्यस्य विवरणम् ॥५[1]/[2]॥

[3]एतदेव हि कामं तु साध्ययोनौ प्रकल्पयेत् ॥६॥

इति। "[4]कामं कामे तु निक्षिपेत्" (३.३) इत्यस्य विवरणम् ॥६॥

बिन्दुना [5]मथनं कृत्वा विसर्गस्थं परामृतम्।
शक्तिमार्गेण योनिस्थं तथा तत्क्षोभयेद् ध्रुवम् ॥७॥

[6]बिन्दुरात्मा समाख्यातो यः प्रबुद्धो मतोत्तरे[7]।

[8]बिन्दुना मथ(थ)नमित्यादि "क्षोभयेद् ध्रुवम्" (३.४) इत्यस्य विवरणम्। [9]मथनशब्देन परिशीलनातिशयं सूचयति। तथा चोक्तं **श्रीमते**—

तन्मध्ये चात्मनो रूपं लक्षयेत्[10] पुनः पुनः।
मथनं ह्येतदाख्यातमज्ञानमलनाशनम् ॥इति।
(कु. मं. १२.६१)

विसर्गो नाम षोडशान्तं चन्द्रद्वीपं ब्रूयात्। **शक्तिमार्गो** नाम सुषुम्ना। [11]तथा च **श्रीमते**— "शक्तिमार्गं सुषुम्नास्थम्" इति। **योनिस्थमिति क्षोभये-**

---

१. 'भवेदि ....मभिधत्ते' नास्ति–त्रि.। २. 'कामे ....रणम्' नास्ति–त्रि.। ३. 'एतमेव तु–त्रि.। ४. 'कामं विवरणम्' नास्ति–त्रि.। ५. मथितं–म.। ६. पङ्क्तिरेषा नास्ति–त्रि.। ७. अत्र 'मतोत्तरे' इति नामदर्शनेन नैव स्यादयं मूलग्रन्थस्यांश इति प्रतीयते। ८. 'बिन्दुना ....विवरणम्' नास्ति–त्रि.। ९. 'मथन ....तथा चोक्तं' इत्यस्य स्थाने— अयमेवार्थो बिन्दुशब्दस्य साधकस्यात्मा कथितः। तथा च' इति–म.। १०. येत्तु–म.। ११. 'तथा ....स्मर्तव्यम्' नास्ति–त्रि.।

दित्यस्याः क्रियाया विशेषणम्। अत्र "कामेन कामितं कृत्वा" (३.४) इति संग्रहमूलोक्तमपि स्मर्तव्यम्। एतेनैतदुक्तं भवति—साध्ययोनौ यथोक्तरूपं कामयन्त्रं परिकल्प्य साध्यस्यात्मानमनेन कामयन्त्रेण यन्त्रितं कृत्वा साधकस्यात्मना साध्यस्य विसर्गस्थममृतं तदा(था) क्षोभयेत्, यथा तच्छक्तिमार्गेण निष्यन्दमानं साध्यस्य योनिस्थितं संपाद्यत इति। साध्यस्य लोकस्येयमेव सा प्रथमं प्रस्तुता परमरहस्यदीक्षेति कथिता ॥७-७ $\frac{1}{2}$ ॥

बहुनात्र किमुक्तेन जल्पितेन वरानने ॥८॥

इति। सुगमम् ॥८॥

अनन्तरं शक्तिबीजयन्त्रमाह—

पूर्वोक्तं यन्त्रमालिख्य त्रिपुरावाचकं महत्।

इति। पूर्वं प्रथममुक्तं (२.१) त्रिपुरायन्त्रमिति वाग्भवयन्त्रमभिधीयते। तद्वक्ष(क्ष्य)माणमहापद्म(३.१०-१७)यन्त्रस्य कर्णिकास्थानं लिखित्वेति यावत् ॥८ $\frac{1}{2}$ ॥

कुण्डगोलोद्भवेनैव स्वयम्भुकुसुमेन च ॥९॥
गोरोचनासमायुक्तं भूर्जपत्रे तु लेखयेत्।

इति। अत्र कुण्डशब्देन स्त्रीचिह्नभूता योनिरुच्यते। गोलशब्देन पुंश्चिह्नभूतं लिङ्गमुच्यते। कुसुमशब्देनार्तवमभिप्रैति। तस्य स्वयम्भूत्वं प्रथमोद्भूतता। तेनानेन कुण्ड गोलोद्भवशब्देन स्त्रीपुंसंयोगसंभूतं सम्मिलितरूपं

---

१. 'ए' नास्ति–म.। २. तथो–म.। ३. त्मानं तेनैव–म.। ४. कामितं–म.। ५. 'स्य' नास्ति–म.। ६. 'सुगमम्' नास्ति–त्रि.। ७. मन्त्रमालिख्य–त्रि. ल.(पृ. २४)। ८. 'पूर्वं ... यावत्' नास्ति–त्रि.। ९. वा–म.। १०. भूतयोनिरभिधीयते–म.। ११. 'उच्यते' नास्ति–म.। १२. तत्र–म.। १३. 'तेन' इत्येव–म.। १४. गोलकोद्भ–त्रि.।

1. त्रिपुराभारतीलघुस्तवस्य व्याख्ययोः (पृ. ३, २४) दृश्यते पङ्क्तिरियम्।

शुक्रशोणितमभिधीयते। **स्वयम्भुकुसुमशब्देन** स्त्रियाः प्रथमोद्भूतमार्तवम्। ताभ्यां **गोरोचनया** च लिखेदिति यावत् ॥९-९$\frac{१}{२}$॥

[१]षोडशारमाह—

[1]षोडशारं महापद्मं द्वादशारं तु बाह्यतः ॥१०॥
पुनः षोडशपत्रं तु द्वात्रिंशत् तस्य बाह्यतः।

[२]इति। कर्णिकास्थानीयं वाग्भवयन्त्रं प्रवर्तयिषु[:] **षोडशारं महापद्मं** लिखेदिति विज्ञेयम्। अरशब्देन दलस्थमिधिट्यन्तौ(?)। तस्य **बाह्यतो** द्वादशारे(रम्), तस्यापि **बाह्यतो द्वात्रिंशदरं** लिखेत् ॥१०-१०$\frac{१}{२}$॥

वाग्भवं कर्णिकायां तु कामराजं तदूर्ध्वतः ॥११॥

[इति।] **कर्णिका**शब्देन मन्त्रमध्यवर्तितयोपचारेण पूर्वोक्तवाग्भवयन्त्र-प्रन्त(न्त्रान्त)र्वर्ति षोडशारं महापद्मं प्रतिपादयति। न खलु दलसमुदायरूपोऽसौ मुख्यतः क(प्र)विभक्तुमर्हति। कर्णिका तु प्रथमं प्रतिपादितं वाग्भवयन्त्रमेव। अत्र **वाग्भव**शब्देन षोडशस्वरा अभिधीयन्ते। तथा च स्वयमेव व्याख्यास्यति— "प्रथमे स्वरसंघाते(तम्)" (३.१३) इति। **कामराज(जम्)**, 'द्वादशस्वरभेदेन भेदयित्वा तु विन्यसेत्" (३.१४) इति व्याख्यास्यमानत्वादनज्व(च्क)मेवात्र कामराजबीजमभिवाञ्छितम्। **तदूर्ध्वत** इति द्वादशार इत्यर्थः ॥११॥

तदूर्ध्वे शक्तिबीजं तु महायोनिः शतं(निगतं) लिखेत्।

इति। **तदूर्ध्वे** द्वादशाराद् बहिर्भूतषोडशार इत्यर्थः। **शक्तिबीज**शब्देन सकारमभिप्रैति। **महायोनि[र्]** नामोत्तरसूत्रे (३.१३) वक्ष्यमाणा, सा यत्र न्यस्यत इत्युपचारेणात्र द्वात्रिंशदक्षरमभिधीयते, **तद्गतं** तदन्तर्गतमिति काम[म्]। तेनायमर्थः— द्वात्रिंशतस्या(दरा)न्तर्वर्तिनि षोडशारे शक्तिबीजं लिखेदिति यावत् ॥११$\frac{१}{२}$॥

---

१. 'षोडशार .... माह' नास्ति–म.। २. 'इति' इत्यारभ्य 'व्याकर्तुमारभति(ते)' (पृ. ३८) इति पर्यन्तं नास्ति–त्रि.।

1. त्रिपुराभारतीलघुस्तवव्याख्यायां (पृ. १६) स्मर्यते प्रथमः पादः।

त्रिदण्डं बिन्दुसंयुक्तं द्वादशस्वरभेदितम् ॥१२॥
महायोनिरिति ख्याता जननी सा जगत्त्रये।

इति। त्रयाणां दण्डानां समाहारस्त्रिदण्डम्। ते(तत्) च हकार-सकारौकारादिसान्तानामन्यतम[म्], बिन्दुरनुस्वारः, द्वादशस्वर ऐकारः। तेनायमर्थः — हकारसकारौकारादिसान्तानामन्यतम ऐकारो बिन्दुश्चेति(ती)यमानुपूर्वि(र्वी) महायोनिसंज्ञितेति। अत्र कादिनान्त(न्ता) एव रूपा यन्त्रस्य बाह्यमण्डले द्वात्रिंशदरे विन्यसनीया इत्यनुकूलमप्यर्थाल्लभ्यम्। यतो वक्ष्यति— "तद्बाह्ये मातृकार्(कां) सर्वार्(र्वाम्)" (३.१५) इति ॥१२-१२$\frac{१}{२}$॥

[1]प्रथमे स्वरसंघातं कामराजं द्वितीयके ॥१३॥
द्वादशस्वरभेदेन भेदयित्वा तु विन्यसेत्।
षोडशारे महापद्मे स्वरं शक्त्यादि भेदयेत् ॥१४॥
तद्बाह्ये मातृकां सर्वां नादबिन्दुकलान्विताम्।
हंसबीजसमारूढां कारयेत् परमेश्वरी(रि) ॥१५॥
एतद् यन्त्रं परं दिव्यं त्रैलोक्येष्वपि दुर्लभम्।
मन्दिरस्योदरे सर्वं सुषिरेण तु वेष्टयेत् ॥१६॥

इति। अथैषां वाग्भवादीनां विन्यासप्रकारस्सास्त्र(स्यास्या)ष्टाभिधानत्वात्तदेव व्यक्तीकरोति। **प्रथमे स्वरसंघातमित्यनेन** पूर्वनिर्दिष्टवाग्भवपदस्य षोडशस्वराभिधायितां व्यावर्णयन् प्रथममण्डलविन्यासप्रकारमाह—**कामराज**मित्यादि। षण्ड(ण्ढ)चतुष्कत्यागेन स्वराणां द्वादशसंख्यातानां पर्यायेण तात्पर्येण द्वादशस्वराणामन्यतमेन स्वरेण सह ब्ल(ब्लूं)कारलकारात्मिका(त्मकं) कामराजं विन्यसेदिति द्वितीयमण्डलविन्यासः। **षोडशार** इत्यादि। **शक्तिरिति** सकारः। तमेवैकशः षोडशभिः सर्वे(स्वरैः) संयोज्य लिखेदिति तृतीयमण्डलवि-

---

1. त्रिपुराभारतीलघुस्तवव्याख्यायां (पृ. १६) दृश्यते प्रथमः पादः।

न्यासः । **तद्बाह्य** इत्यादि । अत्र मातृकाशब्देन समस्तवर्णानामवरो(बो)धेऽपि स्वराणां पूर्वमण्डलेषु विनियुक्तत्वादविहितविनियोगस्य कादिसान्तस्य द्वात्रिंशत एव वा (न्यवैव?) ग्रहणम् । **बिन्दुरनुस्वारः** । **नादो** नाम तस्यैव द्राघियां(घीयान्) ध्वनिर् ऊर्ध्वरेखाविन्यासः । बिन्दुनादो(दौ) एव **कलाः** कलानां वर्णाङ्गभूताः । अत्र बिन्दुनादान्वितः पूर्वोक्ताल्लभ्यते । **हंसबीजपदेन** हकार-सकारौ विवक्षति । द्वात्रिंशदरस्य मण्डलविन्यासः । एतद् यन्त्रमित्यादिमन्दिर-शब्दाभ्यां वर्ता(र्णा)क्षरमाचष्टे । तथा च **श्रीमते** — "मन्थानो मन्दिरः प्रोक्तो वर्णो मेरुरितिश्चरिति ? । **सुषिरः** शब्द आकाशबीजं घोषवर्णम् । तेनायमर्थः— एवंविधमेतद्यन्त्रं मन्दिरसंज्ञाक्षरस्य मध्ये कृत्वा तेन च क्षकारेण सहितमेतद्यन्त्रं सुषिरशब्दस्य हकारेण(रस्य) मध्ये निक्षिपेदिति । अत्र मक्षाभ्यां स्वरव्यञ्जन-व्यामिश्रमयीं सप्तकोटीश्वरीं महामातृकां लक्षयति । अत एव शक्तिबीजयन्त्र-मालिख्य तदभित[:] षोडश-द्वादश-षोडश-द्वात्रिंशदराणि चत्वारि मण्डलानि विधेयानि । तत्र प्रथममण्डले एकैकस्मिन् दले एकैकस्वर इति षोडशस्वरा विन्यसनीयाः । अनन्तरं द्वितीये द्वादशारे षण्ड(ण्ढ)चतुष्टयं(य)वर्जितानां प्रत्येकं कामराजाख्यकलाकारयुक्तानां द्वादशानां स्वराणां यथाक्रमन्यासः । तृती-यषोडशारे प्रत्येकशक्तिसंज्ञितसकारसंयुक्ताः षोडशस्वरा अपि विधेया[:] । चतुर्थे द्वात्रिंशारे एकैकसकारैकारबिन्दुनादोपेता महायोनिसंज्ञिता[:] कादिसान्ता द्वात्रिंशदिति । एवंविधं यन्त्रं वेष्टयन्त्र(यन् तत्र) क्षकारमालिख्य तमपि वेष्टयति । हकारं लिखेदिति ॥१३-१६ ॥

चक्रेऽस्मिन् शक्तिबीजं वै ध्यायेद् वै साधकोत्तमः ।
एषा[1] रक्षा मया प्रोक्ता नाम्ना त्रिपुरभैरवी ॥१७॥

इति । सुबोधम् ॥१७॥

कन्यानामसमोपेता(तो) बिलद्वारं समाश्रिताः(तः) ।
योनिकुण्डादध[:] स्थाप्य होमयेद् राजिकां पुटैः ॥१८॥

---

१. 'एषा ... भैरवी' इत्यस्य स्थाने 'एषा सा मूलचूलाद्या नाम्ना त्रिपुरभैरवी' इति–त्रि. ल. (पृ. ३), 'एकाक्षरा मया प्रोक्ता नाम्ना त्रिपुरभैरवी' इति–त्रि. ल. (पृ. २४)।

इति। योन्याकारकुण्डम्। अयमर्थः — यो नागकन्यकाः कामयते, स सा(ता)सां नाम[ा]नि मनसा सुकीर्तयन् बिलद्वारं समाश्रित्य(तः) योन्याकृति(तिं) च (मपि ?) कुण्डं खात्वा तस्य चाधो यन्त्रं निधाय सर्षपैर्हव्यवाहं तर्पयेदिति ॥१८॥

सप्तरात्रान्महादेवी(वि) क्षुभ्यन्ते मदनोत्कटाः।
विरहानलसंतप्ता मूर्च्छाकुलितविग्रहाः ॥१९॥
पतन्ति साधकस्याग्रे कुण्ड(ण्डा)यामास्तत[:]स्त्रियः।

इति। सुगमम् ॥१९-१९$\frac{१}{२}$॥

भो साधक महासत्त्व हाटकेश्वरविग्रह ॥२०॥
प्रविश्य साधकैः सार्थ(र्ध)मधिकारं कुरुष्व नः।

इति। **भो साधके**ति नागकन्यकानां यन्त्रे बला[दा]कृष्टानां वचः ॥२०-२०$\frac{१}{२}$॥

प्रविश्य क्रीडते सोऽपि यावदाभूतसंप्लवम् ॥२१॥

॥ इति तृतीयः पटलः ॥

इति। सुबोधम् ॥२१॥

॥ इत्युत्तरषट्कविवरणे तृतीयः पटलः ॥

■

चतुर्थः पटलः

अथ स्थूलसूक्ष्मविभिन्नायां श्रीत्रिकविद्यायां स्थूलविद्यां वाग्भवकामशक्तिमयीं यन्त्रादिभिः सह विशेषसहितां निरूप्येदानीं केवलविशेषमयीं सूक्ष्मरूपां शुद्धविद्यां तत्प्रसङ्गेन **श्रीमृत्युञ्जयसारश्रीमदमृतोद्यो**(ताद्यु)क्तमहागुरुमण्डलश्रीमेरुक्रमदेवतास्वरूपसंभूतं पदादिसंकेतमक्षरार्थसंकेतं श्रीमहामातृकामयीं(यं) कुलचक्रं व्याकर्तुमारभति(ते)—

विशेषविद्या देवेशि(शी) कीदृशी कुलगोचरे(र) ।
कीदृशं त्वक्षरार्थं च पादादिं[1] कीदृशं तथा ॥१ ॥
कुलचक्रं कीदृशं तु कथयस्व कुलेश्वर ।

इति ॥१-१ $\frac{१}{२}$ ॥

एवं[2] चतुर्णां प्रश्नानाम(मु)त्तरमनुक्रमेण व्याकरणम्—

वैशेषिकं समुद्धारं त्रिकस्य शृणु[3] सुन्दरि ॥२ ॥
यन्न ज्ञातं सुरेशानि ब्रह्मविष्ण्वीश्वरादिभिः ।

इति । सुबोधम्[4] ॥२-२ $\frac{१}{२}$ ॥

अपरा च परा चैव तथा[5] चैव परापरा ॥३ ॥
त्रिकविद्याक्रमस्यैताः शक्तयः कथिताः पराः ।

इति[6] । **त्रिकविद्याक्रमस्य** वीर्यभूतत्वादिमा विशेषरूपत्वाश्श(च्छ)क्तय **इति कथिताः** ॥३-३ $\frac{१}{२}$ ॥

---

१. पादादीन्–त्रि.। २. 'एवं .... करणम्' नास्ति–त्रि.। ३. प्राणसुन्दरि–त्रि.। ४. 'सुबोधम्' नास्ति–त्रि.। ५. तथैव च–म.। ६. 'इति .... कथिताः' नास्ति–त्रि.।

नादरूपा[ऽ]परा वाणी परा ब्राह्मी परापरा ॥४ ॥
गुरूपदेशतो ज्ञेया त्रिकविद्या मयोद्धता ।
प्रस्तारमहिता[1] विद्या पापसंघक्षयङ्करी ॥५ ॥

इति । **नादो** घोषः, [अ]परा तत्स्वरूपा, अवर्णस्वरूपा । **ब्राह्मीत्याकारः परापराख्या**[2] । वाग्भवादिबीजत्रयविधुरा इयमेव केवला **त्रिकविद्या** केवलं **गुरूपदेशतो**[3] **गम्या** ॥४-५ ॥

प्राक्तनस्य च पीठस्य मन्त्रे(न्त्र)वीर्यस्वरूपिणी[4] ।

इति । **प्राक्तनं पीठमोड्याणाख्यम्**, तस्य **मन्त्रः** प्रणवः, तस्य **वीर्यत्वेन** निविष्टा । अनेन घोषाद्यवर्णब्राह्मीसहितस्य प्रणवस्य[5] रूपं सादाख्यं सूचयतीति ॥५ $\frac{१}{२}$ ॥

विशेषविद्यां[6] सामान्येनाभिधाय तद्भेदान् विप(व)रीतुमुपक्रमति(ते)—

विशेषविद्ययेदानीं विद्याभेदं च भैरवि ॥६ ॥
कथयाम्यद्य देवेशि शृणु वीरेन्द्रनायिके ।

इति[7] । सुबोधम् ॥६-६ $\frac{१}{२}$ ॥

परा परापरा देवि अपरा च तथा क्रमात् ॥७ ॥
वाग्वादिनीति कथिता सर्वविद्योत्तमा मता ।

इति । ब्राह्मी[8] घोषवर्णस्वरूपचक्रमयी विद्या, **वाग्वादिनीति** यावत् । तथा च वाचं व्याहृतवन्तं लोकोऽब्रवीत्—ब्राह्मीमाहेति ॥७-७ $\frac{१}{२}$ ॥

---

१. रहिता–म.। २. सा परा पराख्या–म.। ३. देशैकगम्या–म.। ४. मन्त्ररूपस्व–त्रि.। ५. वस्वरू–म.। ६. 'विशेष .... क्रमति' नास्ति–त्रि.। ७. 'इति। सुबोधम्' नास्ति–त्रि.। ८. 'ब्राह्मी ...विद्या चतुर्विधा (पृ.४०)' इत्यस्य स्थाने 'ब्राह्मी उक्तेति। परा घोषा अपरा त्ववर्णं परापरा ब्राह्मीति यथानुपूर्वी भैरवी विद्या आश्चर्यविभवप्रदेति वाग्भवादीनि विलोमात्मविद्या स्वात्मप्रकाशितासाविति कथिता' इति–त्रि.।

परा[ऽ]परापरपराक्रमा विद्येश्वरेश्वरी ॥८॥
भैरवीति मया प्रोक्ता

इति। **परा** घोषः। **अपरा** वर्णाः। **परापरा** ब्राह्मीनियमानुपूर्वी भैरवी विद्या ॥८॥

आश्चर्यविभवप्रदा ॥८ १/२॥

इति। **आश्चर्यभूतो विभवः** स्फरदमन्दानन्दसन्दोहस्य तदद्भुतस्यात्मरूपस्यापरोक्षि(क्षी)कारः, तं ददातीति यावत्। तथा चाश्चर्यविषयोपलम्भात् संभृतप्रमोदातिरेकादस्य वश एव लोका(को) व्याहरति है(हे)ति ॥८ १/२॥

भैरवी व्युत्क्रमा विद्या यमराज्ञीति संमता ॥९॥
मारणेऽतिप्रशस्ता सा दारणाय महान्विता।

इति। अनन्तरं सूप्रवरसूत्रे[1] कथितस्य **भैरवी**विद्याक्रमस्य विपरीतानुपूर्वी, **यमराज्ञीति संज्ञिता**। विद्यावैपरीत्यं च ब्राह्मीप्रथमवर्णघोषपाठक्रमपदादरुणेति भ्रातृव्यखेदादिनिकृत्वायमहाममन्यं यं हि सिद्धिविद्येत्यर्थः। तथा च दर्विविषहता खवेगान्वस्यमुपहतः। क्रोशतिमिन आ इति ॥९-९ १/२॥

वाग्वादिनीति वैलोम्याभिधा स्वात्मप्रकाशिका ॥१०॥
सौरेति कथिता देवी परमात्मप्रसाधिका।

इति। अत्राद्यवर्णघोषवाग्वादिन्याः क्रमवैलोम्यम् ॥१०-१० १/२॥

विद्या चतुर्विधा देवी(वि) चतुर्वर्गफलप्रदा ॥११॥
ज्ञानेनैव हि विद्यैषा सिद्ध्यत्येवाज्ञया विना।

इति। **चतुर्वर्गफलप्रदातृ[त्व]मेकैकशो विज्ञेय(यम्)**। रमनेने(**ज्ञानेनैवे**)ति विद्याऽद्भुतप्रभावादेव विचार्य विहिता भूतवशात् त[न्]मन्त्रादिमयी-

१. 'चतुर्वर्ग .... व्यावर्णयितुमाह' (पृ. ४१) नास्ति–त्रि.।

1. सूत्रशब्देन व्याख्याकारोऽत्रत्यान् श्लोकान् परामृशति। भैरवी विद्याऽत्रैवोपरितने श्लोके कथिता।

म[ा]ज्ञां परिज्ञानमात्रोपबृंहितः साधकेन्द्रो विद्यादिभिरन्येरवि(न्यैरपि) तत्तत्कार्य-कर्मसम्पदनेष्वयत्नेनैवाधिकं प्रभवतीति तात्पर्यार्थः। अत्र हेतुरियं पारमाश्वरिदाज्ञैति[1] ॥११-११ $\frac{१}{२}$ ॥

इदानीं क्रमप्राप्तमक्षरार्थं व्यावर्णयितुमाह—

अक्षरार्थोपदेशं ते कथयामि शृणु प्रिये ॥१२॥
अपि देवा न जानन्ति कल्पकोटिशतैरपि ।

त्रैपुर[2]विद्याबीजभूतानां वाग्भवकामराजशक्तिभूतानामक्षराणां विनिमय-रूपेण शादिदेवतारूपो योऽर्थः प्रकाश्यते, श्रे(सोऽ)**क्षरार्थः** ॥१२-१२ $\frac{१}{२}$ ॥

तत्र प्रथमं वाग्भवविनिमयरूपजातवेदोवाचकं[3] मन्त्रमुत्थापयति—

श्रीकण्ठो बालिशश्चैव महाकालस्त्वनन्तरम् ॥१३॥
उद्धृतः सहजो मन्त्रो दिव्यो वै जातवेदसः ।

इति। अकारः **श्रीकण्ठः**। यकारो **बालिशः**। मकारो **महाकालः**[4]। [5]एतेनेदं-शब्दस्य पुँल्लिङ्गप्रथमाविभक्त्यैकवचनान्तस्[6]वरूपं(पो) मन्त्रो भवति। [7]अत्रावर्ण-योनि[8]बीजबिन्दुरूपो हि वाग्भवस्य क्रमः। तत्राद्यन्तवर्णयोर्यथावस्थित[9]त एव क्रमः। मध्यवर्गस्य तु योन्याख्यस्य विहितं संहितारूपावस्थायामवर्णेवर्णात्मकत्वेन द्विरूप[10]त्वसंभवात् तद्विनिमय[11]भूतमिवर्णावर्णात्मकं क्रममापाद्य तत्संहितारूपं यकारं मध्यमीकृत्योच्चारः 'अयम्' इति भवति। [12]तदा(था) च साक्षाच्छ्रुतिः—

---

१. 'पारमेश्वर्याज्ञैवेति' इति पाठः स्यात्। २. 'त्रैपुर .... क्षरार्थः' नास्ति–त्रि.। ३. 'कं' नास्ति–म.। ४. 'महाकालः' नास्ति–म.। ५. इतः परम्—'एत(ते)नेदंशब्दभ्य(स्य) महाकालसत्त्व(स्त्व)नन्तरम्। उद्धृतः सहजो मन्त्रो दिव्यो वै जातवेदस इति। अकारः श्रीकण्ठः। यकारो वा विशेषः। मकारो महाकालः' इत्यन्तो द्विरावृत्तः पाठः–म.। ६. न्तस्य रूपं–त्रि.। ७. अत्र–त्रि.। ८. 'बीज' नास्ति–म.। ९. तक्रममध्यपदस्य योन्याख्यस्यापि-शितसंपातारूपावस्या अवर्ण–म.। १०. 'त्वसंभवात्' इत्यस्य स्थाने 'त्वम्' इत्येव–त्रि.। ११. 'भूत .... भवति' इत्यस्य स्थाने 'भूतं वर्णात्मकक्रममापाद्य तत्संपातारूपं यकार-मध्यमं कृत्वोच्चारः। यर्हेवमात्मको मन्त्रो भवति—अयमिति' इति–म.। १२. 'तदा ... नर इति' नास्ति–त्रि.।

"अयमग्निः प्रथमजा ऋतस्य" (ऋ १०.५.७) इति, ' 'सोऽयं लोकः सोऽयमग्निः" (ऐ. आ. १.४.२) इति, "अयमग्निर्वैश्वानरः" (बृ. उ. ५.९.१) इति ॥१३-१३$\frac{१}{२}$॥

अथ कामराजविनिमयमाह—

महाकालोऽथ झिण्टीशः पिनाकी क्रोधभैरवः ॥१४॥
मन्त्रोऽयं पवमानस्य योगिनीमेलनप्रदः ।

इति । **महाकालो** मकारः, **झिण्टीशो** योनिः, **पिनाकी** लकारः, **क्रोधेश्वरः** ककार इत्यनयाऽऽनुपूर्व्या पवमानवाचको **मन्त्रः** प्रकाशितो भवति । [**योगिनीमेल]नप्रद** इति योगिनीभिस्तदे(दी)श्वरादिभिः साधकेन्द्रस्य मेलनं सामरस्यमापादयतीत्यर्थः । इह कामराजान्तिमभूतमनुस्वारमादौ कृत्वा तृतीय-चतुर्थयोरकार-ईकारयोः क्रमं भित्वेव संहितारूपतया योनिबीजतामापाद्य द्वितीयस्य तृतीयतां प्रथमस्याकारस्य चतुर्थतामुत्पाद्य विनिमयः कृतो वेदितव्यः । पवमानोमित्येदा भवति प्राणोऽपानश्च । प्राणोऽग्निः, अपान आदित्यः, तदुभय-मेलना[त्] तद्वाचको मन्त्रो मेलकेवरूपो भवति ॥१४-१४$\frac{१}{२}$॥

अधुना शक्तिबीजस्याक्षरार्थं दर्शयति—

श्रीकण्ठश्च भृगुश्चैवानुग्रहेशो मनुस्त्वसौ ॥१५॥
मार्ताण्डभैरवस्यास्य कथितं ते(तस्ते) मृगेक्षणे ।

इति । **श्रीकण्ठस्तु** आद्यवर्णः । **भृगुः** क्षकारः । औकारोऽनुग्रहेशः । अत्र घोषस्य स्थाने आद्यवर्णविन्यासः । तथा चोक्तं **श्रीनिश्वासकारिकायाम्**—

---

१. जस्य ... यमाह–म.। २. कालो व–म.। ३. 'योगिनी .... त्यर्थः' नास्ति–त्रि.। ४. 'राकार .... मुत्पाद्य' इत्यस्य स्थाने 'रकारं यथाक्रमं पतैव संहितारूपत्यया योनिबी-जतारूपाद्या द्वितीयतृतीयतां प्रथमस्य ककारस्य चतुर्थतां चोद्भाव्य' इति–म.। ५. 'वेदितव्य .... दर्शयति' नास्ति–त्रि.। ६. हेशमनु न्वयम्–म.। ७. 'चोक्तं' इत्यस्य स्थाने 'च' इत्येव–म.। ८. 'श्री .... याम्' नास्ति–त्रि.।

"अकारश्च हकारश्च द्वावेतावेकरूपिणौ" इति । एतेन[२] पुँल्लिङ्गेन[३] शब्दजन्यप्रथमैकविभक्त्यन्तस्य[४] रूपं मन्त्रो भवति । अत एव विभक्तिलोपान्नात्र विसर्जनीयोच्चारः । असौ[५] सौरो मन्त्रः । तथा च श्रुतिः—"योऽसौ तपन्नुदेति" (सूर्यता. १.२), "असावादित्य एकविंशः" (ऐ. ब्रा. १.३) इति च **केवले** ॥१५-१५$\frac{१}{२}$॥

पराया[:] शक्तेः सोमसूर्यवह्निमयविश्वतैजसप्राज्ञपुरत्रयसंदु(न्धु)क्षण्या भट्टारिकाया वाक्यं व्यावर्णा(र्ण्या)द्यपरमशिवप्रधानमन्त्रस्य हंसस्य विषयानुरूपेणाक्षरार्थं दर्शयितुमुपक्रमते—

महाकालो[६] हविसर्गौ[७] ब्रह्मणोऽमिततेजसः ॥१६॥
व्यापकस्य त्रिधाम्नां च मन्त्रोऽयं वीर्यवत्तरः ।

इति । महाकालो मकारः । हविसर्गौ[८] घोषविसर्जनीयौ । अत्र श्लोकबन्धमनुस्मरन्[९] क्रमगोपनमेव वा चिकीर्षन् मन्त्रबीजानामेव साकल्येन केवलमनुग्रहं करोति, न पुनर्व्याक्रियमाणस्य मनोरक्षरक्रमोऽप्ययमिति संदर्शयति । तथा[१०] च **मूलाधारे** दृश्यते—"रहं रूपमास्या(स्था)य" डइति । तत्र द्रीमिति हि वा मन्त्रक्रमः । **श्रीमते**—"रहाराकीकं चैव रस्तं वरानने" इति । अत्र ह्रां क्लीं स्त्रीं इति हि मन्त्रक्रमः । ततश्च **ब्रह्मभूतस्य त्रिधाम्नां** सोमसूर्यादीनां **व्यापकस्य** च **अमितस्य तेजसोऽक्षरार्थत्वेन** प्रतिपादितत्वात् तत्प्रतिपादनक्रमस्य(क्रमं) महच्छब्दमन्तरेण न्यस्य चिन्मात्रे विनि[म]यात्मकन्यासं(सस्य) भाव्यमानत्वात् तदनुरूप एवाक्षरक्रम उत्प्रेक्षणीयः । अयं हि हंसस्य[११] उद्धारक्रमः — प्रथमो घोषः, द्वितीयो भवः, तृतीयो मकारः, चतुर्थो भृगुः, पञ्चमो भव इति[१२] तस्य मकारभवश्रीकण्ठभृगुरूपमन्त्रक्रमविनिमयो ज्ञेयः । अत्र[१३] भृगोर्विसर्जनीयत्वं मन्त्रावसानत्वादापादनीयम् ॥१६-१६$\frac{१}{२}$॥

---

१. लोपिता–म.। २. 'न' नास्ति–म.। ३. ल्लिङ्गिनोदशब्दस्य प्रथ–म.। ४. न्तस्थ–त्रि.। ५. 'असौ. . . क्रमते' इत्यस्य स्थाने 'असौ इति वा समन्त्रस्य विनिमयरूपेणाक्षरार्थं दर्शयितुमुपक्रमते' इति–त्रि.। ६. कालौ भवौ–त्रि.। ७. भवावित्यकारौ सर्गौ–त्रि.। ८. क्रमलोपे तमे वा चिकीर्ष इन्द्रबीजा–म.। ९. 'तथा. . . क्षणीयः' नास्ति–त्रि.। १०. उद्धारसिद्धक्रमः –म.। ११. 'तस्य . . . . ज्ञेयः' नास्ति–त्रि.। १२. तत्र–म.।

क्रमेणानेन मन्त्राणामुच्चारैः कुलदेवताः ॥१७॥
कुप्यन्ति साधकानां च धातून् गृह्णन्ति भैरवि ।

इति । अनेनेत्यक्षराक्ष(र्थ)प्रमाणादर्शितेन । अयमर्थः—एवंविधं क्रमम[न] ङ्गीकुर्वता[तां] साधकानामज्ञापि(त)देवताप्रकारोपनिमित्तः प्रत्यवायो भवति ॥१७-१७½॥

तर्हि तः (सः) क्रम आश्रीयतामित्याह—

तेजोनाम विपर्यासं सिद्धं गुरुमुखोदितम् ॥१८॥
वाग्भवं कामराजं च शक्तिं हंसं कुलेश्वरम् ।
जपन्ति ये महात्मानः शीघ्रसिद्धिं लभन्ति ते ॥१९॥
देवताश्चानुगृह्णन्ति कुलचक्राध्वराश्रयाः ।

इति । अक्षरार्थतया प्रकाशितानि हि वायुसविह्न(वाव्यब्वह्नि)तेजांसे(सि) तेजश्शुद्धाभिधेयानि । तेषां नामानि क्रमादयं मेलको नाम हा इति चत्वारि । एतेषां विपर्यास उद्धारक्रमो दर्शितः । वाग्भवकामराजशक्तिबीजा हंसाः । एतानङ्गीकृत्य पूर्वोक्तानि नामानि भित्वा जपतां श्रीयस्सि(शीघ्रसि)द्धिर्भवति । दैवतानि [वि]पाय(पर्य)यावस्थितैरेव नामभिरुच्चार्यमाणैरुपास्यमानानि प्रीतिमुपायान्ति । तथा च कारिका अ... स्वनामधेयानां प्रौढजनस्फुटोच्चारणादपि बालजनोद्गीर्णै-रनतिस्पष्टविप्लुताक्षरैर्बाला वै(व्या)प्रियमाणा दृश्यन्ते । तथा च श्रुतिः—"इदन्द्रो नामेदन्द्रो ह वै नाम तमिदन्द्रं सन्तमिन्द्र इत्याचक्षते परोक्षेण परोक्षप्रिया इव हि देवाः" (ऐ. आ. २.४.३) इति, "प्रजायेमहि रुद्रिय प्रजाभिरिति ब्रूयान्न रुद्रेत्येत-स्यैव नाम्नः परिहत्यै" (ऐ. ब्रा. ३.३४) इति च ॥१८-१९½॥

---

१. च्चारात्–त्रि.। २. 'अक्ष ....तेन' इत्यस्य स्थाने 'अक्षराक्षप्रमाणादर्शितेन' इति–म.। ३. इतः परम्—'क्रमेणानेन .... अयमर्थः' इत्ययं श्लोकांशो व्याख्यांशश्च पुनरपि लिखितः –म.। ४. 'अयमर्थः....भवति' नास्ति–त्रि.। ५. हितः क्रम इत्याह–त्रि.। ६. विन्यास–म.। ७. सिद्धिगुरुमुखोदितम्–त्रि.। ८. भवन्ति–म.। ९. चक्राद्वराश्रयाः –म.। १०. 'अक्षरार्थ-तया' इत्यारभ्य ६२ पृष्ठस्थ 'त्रिपुरभैरवी' इति पर्यन्तं नास्ति–त्रि.।

